अनानुपूर्व्या गणने तु षण्मासक्षपणादिपुण्यं क्षणेन लभ्यते। इति फलं श्रुत्वा राजा श्राद्धो जातः । नमस्कारगणनपरः स्वर्गं प्राप ॥

श्रीमज्जिनो यत्र विराजते धुरि, मन्त्रो ददातीह परत्र सौख्यकम् ।
मत्वा नमस्कारपदं च जप्यते, विश्वस्य वन्द्यः स भवेद्गुणाश्रितः ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसङ्ग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ
त्रयोदशस्तम्भे १९५ व्याख्यानम् ॥

## ॥ समाप्तोऽयं त्रयोदशः स्तम्भः ॥

## चतुर्दशः स्तम्भः ।

॥ व्याख्यानम् ॥ १९६ ॥

अथ तीर्थंकरनामकर्मोपार्जनहेतूनाह—

सर्वे तीर्थङ्करास्तु स्युरितस्तृतीयजन्मनि । विंशत्या सेविते स्थानैस्तीर्थकृन्नामहेतुभिः ॥ १ ॥

सर्वे जिना ये वर्तन्ते ये पूर्वमतीता ये च भविष्यन्ति ते सर्वे इतस्तृतीयजन्मनि विंशतिपदाराधनेन भवन्ति । अय भावना—ये तीर्थंकरनामगोत्रं बध्नन्ति ते सर्वं एषु मध्ये द्विकादिभिः स्थानैः सर्वैर्वा सेवितैर्नूनं जिननामार्जयन्ति । ते के ? त्रिवेदविषयिण, नपुंसकोऽत्र कृत्रिमः कश्चित् । यत श्रीभद्रबाहुपादाः—

नियमा मणुयगईए इत्थिपुरिसेयरोऽवि सुहलेसो । आसेविय बहुलेहिं वीसाए अन्नयरएहिं ॥ १ ॥

विंशतिपदानि चेमानि, यत पञ्चाङ्गे—

अरिहंत १ सिद्ध २ पवयण ३ गुरु ४ थेर ५ बहुस्सुए ६ तवस्सीसु ७ ।
वच्छल्लया य तेसिं अभिक्खणं नाणोवओगे य ८ ॥ १ ॥
दंसण ९ विणए १० आवस्सए ११ य सीलव्वए १२ निरइयारो ।
खणलव १३ तव १४ चियाए १५ वेयावच्चे १६ समाही य १७ ॥ २ ॥

दयसमश्रेणिस्थया परिधानवस्त्रचरणादावलगन्त्या मेरुनुल्लङ्घ्यादिविधिना [illegible]। [illegible] पिपीलिका-
पितपादयोग्धने उपविश्यानुद्धाटमुखेन यो जपो विधीयते स [illegible] प्रमाण [illegible]। यत —

अङ्गुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलङ्घने। व्यग्रचित्तेन यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥ १ ॥

जपश्रान्तो विशेद्ध्यानं ध्यानश्रान्तो विशेज्जपम्। द्वयश्रान्तः पठेत्स्तोत्रमित्येवं गुरुभिः स्मृतम् ॥२॥

अनानुपूर्व्या गणने तु षण्मासक्षपणादिपुण्यं [illegible]। इति [illegible] श्रुत्वा [illegible]। नम-
स्कारगणनपरः स्वर्गं प्राप ॥

श्रीमज्जिनो यत्र विराजते धुरि, मध्ये ददातीह परं [illegible]।
मत्वा नमस्कारपदं च जप्यते, विश्वस्य [illegible] ॥ २ ॥

॥ इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ
त्रयोदशस्तम्भे १९५ व्याख्यानम् ॥

## ॥ समाप्तोऽयं त्रयोदशः स्तम्भः ॥

## चतुर्दशः स्तम्भः।

॥ व्याख्यानम् ॥ १९६ ॥

अथ तीर्थंकरनामकर्मोपार्जनहेतूनाह—

सर्वे तीर्थङ्करास्तु स्फुरितस्फूर्तीश्वरमति। विंशत्या स्थानैः स्थानैर्नीरङ्गमनदेशनि ॥ १ ॥

सर्वे जिना य वर्त्तते ये पूर्वमतीता ये च भविष्यन्ति ते सर्वे ज्ञाम्भूतीश्वरा विंशतिस्थानासेवनेन ना न्ति। अय भावना—ये तीर्थंकरनामगोत्रं बध्नन्ति ते नर एव मध्य स्त्रियादिनि स्थानि सर्वाणि सेवित्वा जिननामार्जयन्ति। ते के? त्रिदशविशयिए, नपुंसकोऽत्र दृश्यिम कश्चित्। यत् श्रीनवगकारा—

नियमा मणुयगईए इत्थिपुरिसेयरोऽवि सुहलेसो। आसेविय बहुलेहिं वीसाए अन्नयरएहिं ॥ १ ॥

विंशतिपदानि चेमानि, यत आह—

अरिहंत १ सिद्ध २ पवयण ३ गुरु ४ थेर ५ बहुस्सुए ६ तवस्सीसु ७।
वच्छलया य तेसिं अभिक्ख नाणोवओगे य ८ ॥ १ ॥
दंसण ९ विणए १० आवस्सए ११ य सीलव्वए १२ निरइयारो।
खणलव १३ तव १४ चियाए १५ वेयावचे १६ समाही य १७ ॥ २ ॥

श्राद्ध नामोऽर्हत्त्व इति जिनस्य जगद्गुरो । अर्हन्नर्थे विशेषेण कुर्वीत स्नात्रादिभिः ॥ ७ ॥
अन्यथपि जिनेशाराधनासे पुरोदिता । गिल्रादय शियाशातनाद्यभ्यासादरादिभिः ॥ ८ ॥
वक्षिलैकशो पक्ष्ण स्थानमेकैकमेव हि । आराधयन्ति निरत्या पङ्क्तिनिस्तानि विंशतिम् ॥ ९ ॥

समस्तानि जापपदानि समुदायादनुमेयानि ।

तान्येतानि पुरा स्थानेक द्वे समस्तानि वा । यथाशक्ति स्फुरद्भक्ति सेवेत श्रेणिकादिवत् ॥ १० ॥
एवं साधु श्रावको वा साध्वी वा श्राविकाऽपि वा । अमून्याराधयन् स्थानान्याप्नोति जिनसम्पदम् ११

अथ जिनकायतोऽर्हं तृतीयाङ्गे तीर्थंकरगोत्र बद्धा क गच्छतीत्याह—

अधार्जितार्हत्पदा स्युस्ते वैमानिकनाकिन । प्राग्निबद्धायुष केचिद्गच्छन्ति नरकावनौ ॥ १ ॥

अर्हत्पद निकाच्य वैमानिकदेवा जायन्ते । कैश्चित्सम्यक्त्व जिनपदप्राप्तिं च विनाऽऽयुर्नरकसत्क बद्ध पश्चात्तीर्थङ्करपदप्राप्तिर्जाता दृष्टान्तोऽस्मिन्नसत्यश्रेणिकादिवत् ते नरकेऽपि गच्छन्ति, ततस्तीर्थङ्करा जायन्ते । यतो श्रीमदर्हद्दृत्यां—

तिसु तित्थ चउत्थीए केवल पचमीए सामन्न । छट्ठीए विरयाविरइ सत्तमपुढवीए सम्मत्त ॥ १ ॥

आद्यास्त्रिसृभ्य पृथिवीभ्य उद्वृत्ता अनन्तरभवे तीर्थकृतो जायन्ते, न शेषा इति ज्ञेय । चतुर्थ्या उद्वृत्ता सामान्यकेवलित्व लभन्ते, न जिनेन्द्रत्व । पञ्चम्या उद्वृता श्रामण्य सर्वविरतिरूप लभन्ते, न

[illegible] । [illegible] बहुना [illegible], न मुनिर । [illegible] बहुना [illegible] सम्यग्दर्शने, नान्यं [illegible] । [illegible] दर्शयति—

[illegible] इति । [illegible] अरिहन्ता तद्गतकिरिया पउत्तीए ॥ १ ॥

[illegible] । [illegible] ॥ २ ॥

[illegible] बहुना [illegible] नाना [illegible] केचिच्च नति, ये नरा जायन्ति ते [illegible] । [illegible] बहुना नारका निस्सार नरत्व किंतु तिर्यग्योनावेवोत्पद्यन्ते [illegible] । ननु [illegible] निकायेभ्यो [illegible] जायति ? उच्यते—

[illegible] । [illegible] ॥ १ ॥

[illegible] इति [illegible] ।

[illegible] ।

[illegible] । [illegible] गच्छति ॥ १ ॥

॥ [illegible] ॥

---

अथ च्यवनकल्याणकमाह—

देवभवे च तत्सौख्यं भुक्त्वा च्युत्वेह सत्कुले ।
श्रीमत्या ( तो ) भूपते पत्न्याः कुक्षावुत्पद्यते जिनः ॥ १ ॥

यस्तीर्थंकरत्वमुपार्ज्यते स देवभवस्य सौख्यं भुक्त्वा च्युत्वा इहात्र नरक्षेत्रे कर्मभूमौ उत्तमकुले धनाढ्यनृपस्य शीलादिगुणसंपन्नाया पत्न्याः कुक्षौ जिनोऽवतरति । यद्यपि सुराणां षण्मासशेषायुषामिमानि चिह्नानि भवन्ति—

माल्यम्लानिः कल्पवृक्षप्रकम्पः, श्रीह्रीनाशो वाससां चोपरागः ।
दैन्यं तन्द्रा कामरागोऽङ्गभङ्गो, दृष्टेर्भ्रान्तिर्वेपथुश्चारतिश्च ॥ १ ॥

तथापि तीर्थंकरसुराः पुण्योत्कर्षात्कान्तिविज्ञानादिमया एव भवन्ति, यतः—
तेजोऽभिवर्धते तेषां देवानां च्यवनावधिम् । न प्रादुष्यन्ति चिह्नानि च्यवनस्यान्यदेववत् ॥ १ ॥
अन्ये केचिद्देवाः पूर्वोक्तचिह्नानि दृष्ट्वा दृष्ट्वा चिन्तयन्ति—"अहो ! ईदृशं सौख्यं गमिष्यति, गर्भादिषु च दुर्गन्धाढ्यं प्रादुर्भविष्यन्ति, आसां सुराङ्गनादीनां स्वामी को भविष्यति ?" एवं क्रन्दन्ति शोचन्ति च । केऽपि परमार्थज्ञाः सुलभबोधिनो न तथाऽऽत्मानं विडम्बयन्ति । भाविनारं मत्वा केचि-

दिव्य ध्यायन्ति—"कदा वय नरत्व प्राप्य जिनमार्गमनुचरिष्याम ?"। अथ च्यवनमहिमानमाह—

अशिवोपद्रवादीना जगत्युपशम क्षितौ। नारका अपि मोदन्ते यत्र क्षण साधसुखोदया ॥ १ ॥

ऊदज्ञानिमुखस्तीर्थंकरार्के समन्वदिति। निशायामनकम्पेन मुदिता नाकिनायका ॥ २ ॥

सिंहासनात्समुत्थाय विनयात्त्यक्तपादुका। पदान्यागत्य सप्ताष्टौ श्रीजिनाभिमुख स्यात् ॥ ३ ॥

पश्चात्प्रणिपातेन प्रणम्य जगदीश्वरम्। घटिताञ्जलय कुर्युः स्तुतिं शक्रस्तवेन ते ॥ ४ ॥

अत्र "सक्कस्स य आसण चलिय सिग्घं आगलूण यावत् तव पुत्तो पढमधम्मचक्कवट्टी भविस्सति। केइ भणति—अत्तीम पि डदा आगतूण वागरिति" इत्यावश्यकहारिभद्र्या श्रीऋषभगर्भावताराधिकारे। इत्याद्यवश्यकोत्सवपद्धति बहुश्रुतेभ्योऽवसेया। अथ गर्भावासे जिन आगते मातुर्यद्भवति तदाह—

तस्मिन्नवसरे नामभवने स्वर्गृहोपमे। स्व शय्योपमशय्याया शयिता च मृगेक्षणा ॥ १ ॥

समधातु सुप्रसन्नचित्ता स्वप्नांश्चतुर्दश। निशीथे गर्भमायाति जिने साक्षाद्विलोकते ॥ २ ॥

स्पष्टं। अत्र चतुर्दशस्वप्नवर्णन प्रतीतमतो न लिख्यते। अथान्यश्रेष्ठनराणा माता कति स्वप्नान् पश्यन्तीत्याह—

सार्वभौमस्य माताऽपि स्वप्नानेतान्निरीक्षते। किंतु किञ्चिन्न्यूनकान्तीनर्हन्मातुरपेक्षया ॥ ३ ॥

यस्या पुत्रो नरेश्वरोऽर्हश्चेह जन्मनि। सा हि स्वप्नानिमान् पश्येत्तथोक्त पूर्वसूरिभि ॥ ४ ॥

अचिरा(विश्वराट्) पत्नी शीलशीलासमुज्वला । सा द्विश्चतुर्दश स्वप्नान्निशाशेषे व्यलोकयत् ॥५॥
इति श्रीशत्रुञ्जयमाहात्म्ये उक्त ।

एतेषामन्तरात्सप्तालोकयेद्वासुदेवसूः । चतुरो बलदेवाम्बाऽथैक माण्डलिकप्रसूः ॥ ६ ॥
प्रतिकेशवमाता तु त्रीन् स्वप्नानवलोकयेत् । मातैक पश्यति स्वप्न मुनेरपि महात्मन ॥ ७ ॥
मुनेर्मेघकुमारादेर्मातादिवदित्यादि स्वमत्याऽभ्यूह्य इति । अथ प्रस्तुत—
ज्ञानत्रयान्वित स्वामी गर्भरूपेण योऽवसत् । अहो जगत्प्रवाहोऽय नोल्लङ्घितो जिनैरपि ॥ १ ॥
गर्भेऽपि पुपितश्चैव स्वर्गाच्युत्वा तथाप्यसौ । विश्वेषु प्रकटीभूत इन्द्रैर्नुत सदा स्तवै ॥ २ ॥

॥ इत्यब्ददिनपरिमितोपदेशसङ्ग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ
चतुर्दशस्तम्भे १९७ व्याख्यानम् ॥

---

## ॥ व्याख्यानम् ॥ १९८ ॥

अथ जिना ज्ञानत्रयसमेता आयान्तीत्याह—

स्वर्गाद्वा नरकाद्वा ये यस्मादायान्ति तीर्थपाः । ज्ञानत्रय ते तत्रैत्य विभ्रते गर्भगा अपि ॥ १ ॥

स्पष्ट । नवर मतिश्रुतावधिज्ञानत्रयमन्यसुरेभ्योऽपि तीर्थकृत्सुराणामनन्तगुण श्रेष्ठतर स्यात्, तेन सहैवात्र गर्भेऽवतरन्ति । तदा मातु शरीर गर्भानुभावात्स्वच्छपुद्गलमय सुगन्धमय भवति, न पुनरन्यना-

रीमदनां बीजत्समयं गर्भस्थस्य स्यात्। दिव्यरूपा जिनेन्द्रावतरणार्हा योनिर्मृगमदघनसारादिभ्योऽपि श्रेष्ठा। तत्रैव जिना उत्पद्यन्ते मुक्ताफलमिव हीरकमिव, परं न तत्र कोऽपि अशुभपुद्गलस्थितिसञ्चयो जायते। मात्रा गृहीताहारोऽपि शुभरूपेण परिणमति भक्तो भक्तानात्, जलधरगृहीतक्षारजलमिव। तथा जिनगर्भप्रसवानन्तरं कदापि तत्र मातृगर्भे न कोऽपि जीवः पुनः समुत्पद्यते। अत एव स्तुत्यगोचरदिव्यरूपयोनित्वेन निखिलभूतलस्त्रीवृन्दान् विहाय पुण्यपात्रमुत्तमकुलकुक्षिर्धर्मध्यानतत्परामनन्तपुण्यैर्दुर्लभ्यजिननां जन्यामगण्यपुण्यसौभाग्यामात्याश्लाध्यधर्मधुरन्धरामित्यादिगुणान्विता मत्वा स्वामी जननीत्वेनाङ्गीकरोति। सा जनन्यपि एतादृशपुत्रप्रादुष्करणार्थमियमेव पुण्याढ्या समर्था जगन्नाथजननीत्वधारका च। यतः—

> स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्, नान्या सुतं त्वदुपमं जननी प्रसूता।
> सर्वा दिशो दधति भानि सहस्ररश्मिं, प्राच्येव दिग्जनयति स्फुरदंशुजालम्॥ १॥

इति प्रसङ्गात्। अथान्यजीववज्जिनगर्भेऽपि दुःखं जनिष्यतीत्याशङ्क्याह—

गर्भगते जिनेन्द्रे हि दुःखं नाप्नोति कर्हिचित्। माता च गर्भजीवोऽपि तथैव प्रसवादिषु॥ १॥

स्पष्टः। नवरं गर्भगतजीवानां दुःखं शास्त्रे यदुक्तं। तथाहि—

> सूईहिं अग्गिवण्णाहिं भिज्जमाणस्स निरंतरं। जावइयं गोयमा दुक्खं गब्भे अट्ठगुणं तओ॥ १॥
> गब्भाओ नीहरंतस्स जोणिजंतनिपीलणे। सयसाहस्सियं होइ दुक्खं कोडिगुणं पि वा॥ २॥

त्रीणि कदलीगृहाणि विकुर्वन्ति, तेष्वेकैकं चतुःशालं वेश्म सिंहासनान्वितं च । ततो जिनं करसंपुटे संगृह्य दत्तावलम्बा जिनाम्बां पुरस्कृत्य दक्षिणदिग्गृहे नीत्वा रत्नासने निवेश्य दिव्यतैलैरभ्यञ्जन्ति, सुगन्धिद्रव्यचूर्णैरुद्वर्तयन्ति । ततः पौरस्त्यकदलीगृहे प्राग्वत्समानीय सिंहासने संस्थाप्य सुगन्धिपुष्पोदकैर्मज्जयित्वा सर्वालङ्कारभूषितौ प्रकुर्वन्ति । तत उदीच्यकदलीगृहे सिंहासनेऽङ्कविन्यस्तनन्दनां तामध्यासयन्ति, गोशीर्षचन्दनैधांसि सेवकैरानाययन्ति, अरणिकाष्ठसंघट्टनेन नवमग्निं प्रकटीकृत्य तत्र गोशीर्षचन्दनं हुत्वा रक्षां पातयन्ति । ततो द्वयोर्हस्ते प्रेतादिदोषघातार्थं रक्षापोट्टलिकां बध्नन्ति । ततो वृत्ताश्मगोलकावास्फाल्य शैलायुर्भूया इत्याशीर्गिरं प्रभोः संगिरन्ति । ततो यथा गृहीतौ तथा जन्मगृहे शय्यायां नीत्वा भक्तितो गायन्ति । अथासां देवीनां भुवनपतिजातीयत्वं श्रुतधरैर्निश्चीयते, यतः कासाञ्चिद्दिक्कुमारीणां व्यक्त्या स्थानाङ्गे पल्योपमस्थितेर्गणनात् समानजातीयत्वादासामपि तथाभूतायुषः संभाव्यमानत्वात् । अपरिगृहीता इमा देव्यः सन्ति, अतो दिक्कुमारीत्वमिति ॥

एवं च दिक्कुमारीभिर्जन्मोत्सवः कृतः प्रभोः । जम्बूद्वीपागमादत्र लिखितो लेशमात्रतः ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसङ्ग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ चतुर्दश-

स्तम्भे १९७ व्याख्यानम् ॥

[illegible] । [illegible] उन्न गला तहुल्लव ततोल (परेत्) ॥ १ ॥
[illegible] । [illegible]-मनःपर्यायज्ञानादि[illegible] जिनोत्पत्ति [illegible]
[illegible] जिनेन मुया पूर्वाभिमुख [illegible]
[illegible] उभाजिरेक कार्ये [illegible] निखिल
[illegible] । [illegible] सर्वासां देवानामस्माके
[illegible] रोमनरिमिज्ञ जीन् यरान् यादवति ।
[illegible] [illegible] । तासां [illegible]
[illegible] [illegible] समागत्य सततं
[illegible] । तत इन्द्रो यानविमान-
[illegible] । [illegible] पाठका
[illegible] पड्—[illegible]
[illegible] । [illegible] नेति ।
[illegible] [illegible] स्यात् । तत्र मध्ये

[illegible] ॥ इति च [illegible]

[illegible] । थायुर्मा [illegible]

[illegible] । [illegible] पादिका [illegible]

[illegible] । [illegible]

[illegible] । [illegible] कृत्वा [illegible]

[illegible] । [illegible] प्रविश्य, [illegible]

[illegible] । [illegible]

[illegible] । तत —

[illegible] । निपतन्ति [illegible] ॥ १ ॥

[illegible] विलाप [illegible]

[illegible] । ततो [illegible]

[illegible] । [illegible]

[illegible] । [illegible] मातः !

अनुजानीहि, मनागपि न भेतव्यं, वयं त्वत्सुतस्य जन्मोत्सवं करिष्यामः" । इत्युदित्वा प्रभोर्मातुरवस्वापिनीं दत्त्वा प्रभोः प्रतिकृतिं हरिस्तत्पार्श्वे स्थापयति, यतः स्वयं जन्मोत्सवव्यग्रचित्तत्वात्कश्चिद्दुष्टदेवः कुतूहलप्रियश्चेज्जिनं हरति तदा सुतमनालोक्य माता वा परिजनो वा दुःखजागृ मा स्म भूत् विषाद मा यासीदित्ययमुद्यमः । ततः इन्द्रः पञ्च मूर्तीः कृत्वा एकया मूर्त्या धौतपूतधूपितकरसम्पुटेऽर्हन्तमादत्ते, एकया छत्रं, द्वाभ्यां चामरौ, पञ्चम्या च मूर्त्या वज्रमादाय नृत्यन्जिननायस्य पुरो गच्छति । तद्विमानं तु त्रिदशपरानुगच्छति । अत्रानेकपरिकरे सत्यपि यदिन्द्रस्य स्वयमेव पञ्चरूपविकुर्वण (करण) तत्रिजगद्गुरोः परिपूर्णमवाप्तिप्रतीति । अनेकदेवैः सहितो मन्दरमौलिस्थपाण्डुकवने यत्र पाण्डुकम्बल(कम्बला)शिलोपरि शाश्वतमणिमयसिंहासनमस्ति तत्र पूर्वाभिमुखः इन्द्रो जिनमुत्सङ्गे धृत्वा निषीदति । एवमीशानेन्द्रोऽपि स्वस्वपरिकरयुतः सुरासुरावृतः पदातीशः दयानां बोधहेतवे महाघोषाघण्टां वादयति । ततः पुष्पकामरपार्श्वे पुष्पकाख्यविमानं कारयित्वा आरुह्य शक्रवदागच्छति दाक्षिणात्येन निर्याणमार्गेणोत्तीर्य नन्दीश्वरे उत्तरपौरस्त्यरतिकरगिरावेति । तत्र तद्विमानं संक्षिप्य स्वर्णगिरिं समेत्य शक्रवत्स्तुत्वा जिनाधिपं सेवते । एवं त्रयाणामपि स्वाधिनायानां शक्रवदागमनं मन्दरे ज्ञेयं । परमत्रोत्सवे सर्वेषां युगपदेव समागमनात्क्रमस्य बाधमानं बाह्यनुपदिष्टम् —

"वैमानिका दश भुवनेशाश्च विंशतिः । द्वात्रिंशद्व्यन्तरेन्द्रा द्वौ सूर्याचन्द्रमसाविति ॥ १ ॥"

ज्योतिष्का असङ्ख्याता आयान्ति तथापि जातिव्यपेक्षया द्वावेवात्र वक्ष्येते । समवायाङ्गे च व्यन्तरे-

न्द्रयजां द्वात्रिंशदिन्द्रा प्रोक्ताः सन्ति । नवमदशमकल्पयोरिन्द्र एक एव, तथैकादशद्वादशकल्पयोरप्येक एपातोऽत्र दश वैमानिकेन्द्रा ज्ञेया । अथैषा परिकर —

चुलसी १ असीइ २ बावत्तरि ३ सत्तरि ४ सट्ठि ५ य पण्णास ६ चत्ताला ७ ।
तुल्ल सुर तीस ८ वीसा ९ दससहस्स १० अयरक्ख चउगुणिया ॥ १ ॥

इत्यादिको ज्ञेय । अथ दशकल्पाना घण्टानामानि—

तृतीये पञ्चमे स्वर्गे सप्तमे दशमेऽपि च । घण्टा सुघोषाऽथ हरिणैगमेषी पदातिराट् ॥ १ ॥
तुर्ये षष्ठेऽष्टमे च द्वादशे स्वर्गे विमौजसाम् । घण्टा पत्तीशनामादि पूर्वोक्त शुक्रपाणिवत् ॥ २ ॥

अथ दशकल्पेन्द्राणा यानविमाननामानि—

पालकः १ पुष्पक २ सौमनस ३ श्रीवत्ससञ्ज्ञकः ४ ।
नन्द्यावर्त ५ कामगम ६ तथा प्रीतिगमो ७ ऽपि च ॥ १ ॥
मनोरम ८ श्च विशालः ९ सर्वतोभद्र १० इत्यमी ।
क्रमाद्दशानामिन्द्राणा प्रोक्ता यानविमानकाः ॥ २ ॥

विमाननाम्ना तदध्यक्षा सुरा अपि ज्ञेयाः । अथ चमरेन्द्रस्य उंघस्वरा घण्टा, द्रुम पादातीशः, विमान पालकार्धमान स्यात्, ध्वजश्चास्य महेन्द्रध्वजतोऽर्धमान । एव बलीन्द्रस्यापि, पर घण्टा महौ-

घस्वरा, पादात्येशो महाद्रुम स्यादिति । शेषाणां दक्षिणेन्द्राणां नवानां भद्रसेन पादात्येशः, उत्तरेन्द्राणां दक्षमहा पत्तीशः । विमानं ध्वजश्च चमरेन्द्रतोऽर्धं इति ।

तथा मेघस्वरा १ हंसस्वरा २ क्रौञ्चस्वराऽपि ३ च । मञ्जुस्वरा ४ मञ्जुघोषा ५ सुस्वरा च ६ मञ्जुस्वरा ७ ॥१॥
नन्दिस्वरा ८ नन्दिघोषा ९ घण्टामहाः क्रमादिमा । नागादिषु निकायेषु देवेन्द्राणां निरूपिता ॥ २ ॥

तथा याम्यानां व्यन्तरेन्द्राणां घण्टा मञ्जुस्वरा, उदीच्यानां मञ्जुघोषाभिधा घण्टा च स्यात् । तेषां यानं सहस्रयोजनायाम, ध्वजश्च पञ्चविंशत्यधिकशतयोजनोच्छ्रितः स्यात् । ज्योतिष्केषु चन्द्राणां सुस्वरा भिधा घण्टा, सूर्याणां च सुस्वरनिर्घोषा, शेषं पूर्ववत् ज्ञेयं । भुवनपतिव्यन्तरज्योतिष्कदेवेन्द्राणां विमानकेष्विव सुरा न स्युः, किन्त्वाभियोगिका कुर्वन्ति ।

अथेन्द्रः सर्वर्द्ध्याऽन्वित उत्सङ्गे उत्तानस्थापितकरयोर्मध्ये जिनं धृत्वा निषीदति । ततोऽच्युतेन्द्र स्वाभियोगिकान् वदति—"भो ! अर्हज्जन्माभिषेकार्हां सामग्रीं सज्जयन्तु" । ततस्ते सौवर्णान् १ रौप्यान् २ रात्नान् ३ स्वर्णरत्नमयान् ४ रूप्यरत्नमयान् ५ रूप्यस्वर्णजान् ६ स्वर्णरत्नरूप्यजान् ७ मृण्मयान् ८ (च) प्रत्येकं सहस्रमष्टाधिकं कलशान् विकुर्वन्ति । अन्यान्यपि तावद्भृङ्गारचामरतैलसमुद्गकचङ्गेर्यादर्शादीन् सहस्रमष्टाधिकं ते रचयन्ति । ततः कृत्रिमाकृत्रिमान् कुम्भादीनादायाभियोगिकाः क्षीरोदधिगङ्गादितीर्थानामुदकं पङ्कजानि चानयन्ति । तज्जम्बूद्वीपप्रज्ञप्तिसूत्रे प्रोक्तं, यत—"खीरोदग गिण्हंति गिण्हित्ता

१ कारिणः ।

जाइ तत्थ उप्पलाइ पउमाइ जाव सहस्सपत्ताइ ताइ गिण्हति, एव पुक्खरोदाउ जाव नरदेवनयाण मागहाइतित्थाण उदग मट्टिय च गिण्हति" इत्यादिपाठो वाच्य. । अत्र(थ)नन्दनवनादिभ्यो गोशीर्षचन्दनादीन् गृहीत्वाऽखिल संचित्य ढौकयन्ति । ततोऽच्युतेन्द्र पुष्पस्रग्भोजितगण्डै पद्मोत्पलपिहितैर्कुम्भैश्चतु पष्ठ्याधिकैरष्टभि सहस्रैर्जनपाथोधिपाराय स्वपरिकरान्वित प्रागुक्तोदकपुष्पाद्यैरर्हन्तमभिषिञ्चति । अच्युतेन्द्राभिषेकेऽत्र ईशानेन्द्रादयोऽपरे ऊर्ध्वदमा प्रभु निषिञ्चन्ति । अन्ये केचिद्गायन्ति, केचिन्नृत्यन्ति, केचिद्गजाश्वगर्जितानि प्रभो पुर कुर्वन्ति । एवमभिषिच्यार्हन्त नत्वाऽच्युतेश्वरो गन्धकाषायिकेणाङ्ग रूक्षयति । तत साक्ङ्कार प्रभु विधाय प्रभो पुरो रूप्यतण्डुलै सुवर्णपट्टेऽष्टौ मङ्गलान्यालिख्य ढौकयेत् । ततो द्वात्रिंशद्विध नृत्यमग्रे पुष्पप्रकर धूप च विधायाष्टोत्तरशतवृत्ते स्तुति करोति । सा चैव जम्बूद्वीपप्रज्ञप्तिसूत्रेऽपि—"धूव दाऊण जिणवरिंदस्स सत्तट्ठपयाइ पोसरित्ता दसगुलिय अञ्जलिं करिय मत्थयसि पयउ अट्ठसयविसुद्धगथयुत्तेहिं अपुणरुत्तेहिं सथुणइ जाव ण्य वयासीति "नमोऽत्थु ते सिद्ध बुद्ध णीरय समण णीरागदोस निम्मम धम्मवरचाउरतचक्कवट्टि नमोऽत्थु ते" । इत्यादिस्तुति नार्कि (च) विधाय प्रभो पुरो विनयेन तस्थौ । एव त्रिषष्टिरपि देवेन्द्रा. सौधर्मेन्द्रवर्जिता अनुक्रमेणानेन विधिनाऽभिषिञ्चन्ति । तत ईशानेन्द्र पञ्च मूर्ती विकुर्व्य (कृत्य) एकया मूर्त्या जिनमुत्सङ्गे धृत्वा शक्रस्थाने निषीदति, एकया छत्र, द्वाभ्या चामरे, एकया पुरत शूल धृत्वा नृत्यवत्तिष्ठति । अथ शक्रोऽपि सर्वा सामग्रीं प्राग्वद्विधाय स्नात्र कुरुते, परमेष विशेष —चत्वारि वृषभरूपाणि कृत्वा चतुर्दिक्षु तेषाम-

प्रत्य· शृङ्गेभ्योऽष्टौ तोयधारा ऊर्ध्वमुत्पत्य एकत्र सम्भूय प्रभोर्मूर्धनि क्षरन्ति । तत शक्र सपरिकरो-ऽच्युतेन्द्रवत् कुम्भैर्विधिर्जिनमभिषिञ्चति, इत्यादि नमोऽस्तु ते इति यावत् पर्युपास्ते । अथात्र कृष्णमु-खेन्य कलशादिसङ्ख्या ऽप्यमपि श्रुताऽस्ति, तथाहि—एकैकजातिनिष्पन्ना अष्टौ सहस्रा कुम्भा , तेऽष्ट-गुणा कृताश्चतुःषष्टिसहस्रा जाता , एतावन्मितै कुम्भैरेकैकोऽभिषेक स्यात् । एव च चतुःषष्टीन्द्रत्रय-स्त्रिंशत्त्रायस्त्रिंशकसुरशक्रलोकपालाग्रमहिषीपर्षत्सुरादीना पञ्चाशदधिकशतद्व्याभिषेका स्यु , तदा चतु -ष्षष्टिसहस्रा कुम्भाः पञ्चाशदधिकद्विशताभिषेकगुणा कृता एककोटि षष्टिलक्षा भवन्ति । उक्त च पूर्वं —

पणवीसजोयणतुगो बारसजोयणाऊं वित्थारो । जोयणमेग नालऊं एगकोडि सट्ठि लक्खाइ ॥ १ ॥

अथेन्द्र सर्वेन्द्राभिषेक कृत्वा प्राह—"हे परमेश्वर ! कृपावतार ! मत्सदृशैरनन्तैरिन्द्रै सपूज्यसे तथापि त्वत्तीवरागता पूज्यता नाप्येऽपि धीरता च नकु न केऽपि क्षमा । वय ससारविकारभृता अना-त्मनीनमहिम्नस्तावक्रस्नानमात्रपूजने कथ समर्था भवाम ? तथापि नि स्पृहस्य तवास्माभिरात्महि-तार्थं विहिता भक्तिर्बोधिदा स्यात् । तथा हे जिन ! अस्मद्विज्ञानुगस्त्वमत्रागतस्तेनाश्चर्येण विचारमग्ना वय चिन्तयामः । अस्माभिरिन्द्रत्व लब्ध तदद्यैव सफल जात ।

अद्योरुव्योम ये लोकव्योम्नि तेषु क्षमा जिना । तदाश्रयतयाचित्तं कृपाभि भवजायत ॥ १ ॥"

इत्यादिस्तुती कृत्वा कृतकृत्यः पञ्चरूपेण सेवापरो जन्मगृहमेत्य प्रभु मातु पार्श्वे सस्थाप्य तत्प्रतिकृति निद्रा च सहृत्य महाउकूलयोर्युगल कुण्डलयुगल च विभोरुच्छीर्षके सस्थाप्यैक रत्नमयोल्लोच वद्ध्वा हरि स्वाम्यङ्गुष्ठे क्षुधाशान्त्या अमृत स्थापयति यन्मुखे क्षिपन्तोऽर्हन्तोऽस्तन्यपा अपि तृप्यन्ति । तत शक्र उन्द्राज्ञया श्रीदेनाज्ञया जृम्भकामरा द्वात्रिंशत्कोटिस्वर्णादीना जिनालये वृष्टि विकुर्वन्ति । तत शक्र उद्घोषणा कारयति—"य प्रभोर्मातुर्वा विरूप चिन्तयिष्यति तस्य मूर्धा आर्यकमञ्जरीवत्स्फुटिष्यति"। तत सर्वे देवा नन्दीश्वरे गत्वाऽष्टाह्निकोत्सव कुर्यु । अथाग्रे कृत्य तत्कल्पादिसूत्रतो ज्ञेयमिति ॥

जन्माभिषेकेऽपि कृतेऽच्युताद्यै-रिन्द्रैश्चतु षष्टिमितैः सुमेरौ ।
वालोऽपि न क्षोभमवाप कश्चित्, कुम्भोदपूरेण जिन. स जीयात् ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसग्रहाख्यायामुपदेशप्रासादग्रन्थस्य वृत्तौ
चतुर्दशस्तम्भे व्याख्यानम् ॥ १९९ ॥

## ॥ व्याख्यानम् ॥ २०० ॥

अथ शैशवेऽपि जिना क्रीडापराङ्मुखा भवन्तीत्याह—

जगदुत्कृष्टसौन्दर्या बाल्येऽप्यचापलवुद्धय । जितेन्द्रियाः स्थिरात्मानो यौवनोद्योतिता अपि ॥ १ ॥

अथ प्रभावमुख्येषु नामका स्युरित्याह—

यद्दीक्षां दर्शयन्तोऽत्यन्त शुद्धाः प्रभावत् । प्राक्षेऽपि चक्रभृद्राज्ये न व्यामला जयन्ति ते ॥ १ ॥

अथ लोकान्तिककृत्यमाह—

प्रव्रज्यावसरं स्वस्य ते ज्ञानेन विदन्त्यथ । तस्मिंश्च समयेऽभ्येत्य देवा लोकान्तिका अपि ॥ १ ॥

नत्वा विज्ञपयन्त्येवं जय नन्द जगद्गुरो । त्रैलोक्यस्योपकाराय धर्मतीर्थं प्रवर्तय ॥ २ ॥

अथ वार्षिकदानविधिमाह-

ततो दीक्षादिनादर्वाग्वर्षशेषे जिनाधिपाः । दानं धर्मयुक्तं मत्वा दानं ददति वार्षिकम् ॥ १ ॥

स्पष्टं । दानविवरणप्रकारस्त्वयं—यदा प्रभुर्वार्षिकं दानं दातुमध्यवस्यति तदासनप्रकम्पेनावधिना शक्रो जानाति—"त्रिकालोत्पन्नजिना जीनमेतद् यदर्हत प्रव्रज्यावसरे वार्षिकदानाय त्रिशतकोट्योऽष्टाशीति कोट्योऽशीतिलक्षाणि सौवर्णिका देयाः" एवं निश्चित्य धनदमाज्ञापयति । ततस्ते जृम्भकामरा जिनगृहे पूर्वोक्तं द्रव्यं निक्षिपन्ति । अत्र वृद्धमुखेभ्य इदमपि श्रुतं, तद्यथा—अशीतिरतिनिर्निण्यत एकः सौवर्णिकः स्यात् मध्ये स्वनाम पितुर्नाम च भवति । एकवासरस्य दानस्य सौवर्णिकानां स्वर्णं नवसहस्रमणमितं स्यात्, चत्वारिंशता मणैरेकं शकटं क्रियते, एवमेतावन्त्यानि शकटानि पञ्चविंशत्यधिकशतद्वयं भवन्ति । प्रत्यहं सौवर्णिकानामेका कोटिरष्टौ लक्षाश्च दीयन्ते । सर्वान् वार्षिकदानयोग्यान् सौवर्णिकानिन्द्रादेशेन वैश्रमणाभ्या अष्टसु समयेषु मध्ये निष्पाद्य तीर्थकरगृहे स्थापयन्ति । तद्दानस्य पञ्चातिशयाः, तथाहि—

मनोर्हस्ते सौधर्मेशः स्थितिं विदधाति यद्दानं ददत् प्रभुर्न श्रममेति इति भक्तिबुद्ध्या, पर जिनस्त्वनन्तेन्द्रबलसमन्वितोऽस्ति १। ईशानेन्द्रस्तु सुवर्णयष्टिं करे धृत्वा ऊर्ध्व तिष्ठति चतु षष्टीन्द्रवर्जान्यदेवाना दानं गृह्णता निषेधति। तथा यादृशं ग्राहकनरेभाग्य तादृशी तन्नरमुखेभ्यो वाक्योच्चारता(णा) कारयति २। चमरेन्द्रबलीन्द्रौ प्रभुमुष्टिगतसौवर्णिकान् दानग्राहकनरवाञ्छितानुसारेणान्यूनाधिकान् कुरुत, यदि तन्नरेप्सितेभ्योऽधिकास्ते स्युस्तदा न्यूनीकुरुत, यदि च न्यूना मुष्टिमध्ये समेतास्तदा तन्नरवाञ्छितानुसारेणाधिकान् कुर्वाते ३। अन्ये भुवनपतयो भरतोत्पन्नमनुष्याणा दानग्रहणार्थमाकर्षणक्रिया कुर्वन्ति ४। वानव्यन्तरसुरास्तान् पश्चात् स्वस्थाने स्थापयन्ति ५। ज्योतिषिका विद्याधराणा दानसमय ज्ञापयन्ति ६। तस्मिन् प्रस्तावे तीर्थंकरस्य पिता तिस्रो महत्य शालाः कारयति, एकस्या शालाया भरतजातनराणामश्वादीन् दापयति, द्वितीयस्या वस्त्राणि, तृतीयस्यामाभरणानि च। चतु षष्टीन्द्राणा दानग्रहणमहिम्ना परस्पर द्वावब्धी यावत् कलहो नोत्पद्यते। चक्रवर्तिनराणा सौवर्णिकप्रभावेण कोशस्तु द्वादश वर्षाणि यावदक्षय स्यात्। सरोगिणा द्वादश वर्षाणि यावन्नूतनरोगा नोत्पद्यन्ते इति। तथा सर्वत्रोद्घोषणा "यथेप्सित वर वृणुत" इति कारयति। अत्र केचिद्वदन्ति–"दानफलमवश्य भोग्यतामेति, अन्यथा तत्फल पन्धाभावो न स्यात्, अतो जिनास्तु दान न ददति" इति ढुढका जल्पन्ति तदयुक्त, पञ्चाङ्गे मत्स्यवध्यपरे प्रकटाक्षरा सन्ति। तथा जिनाः कीर्त्यादिहेतवे दान न ददति। यत —

धर्मप्रभावनाबुद्ध्या लोकानां चानुकम्पया । जिना ददति तद्दानं न तु कीर्त्यादिकाङ्क्षिणः ॥ १ ॥

अथ दीक्षाकल्याणमाह—

प्राप्यानुज्ञां ततो दीक्षां पित्रादेस्तदनु प्रभुः । शक्रभूपादिभिर्भक्त्या कृतनिष्क्रमणोत्सवः ॥ १ ॥

स्पष्टः । इन्द्राश्च नृपादयश्च तैर्निष्पादितदीक्षोत्सवस्त्वयं—दीक्षादिने स्वजनास्तन्नगरं ध्वजश्रेण्याद्यलङ्कृतं कारयन्ति । तस्मिन्नवसरे चतुःषष्टीन्द्रा आसनकम्पेन प्रभोर्दीक्षाक्षणं ज्ञात्वाऽऽगच्छन्ति । ते पूर्वोक्ताष्टजातीयान् कलशान् पूजोपकरणानि च पृथक् पृथक् अष्टाधिकसहस्रं कारयन्ति । स्वजना अपीन्द्रवत् कलशान् शिल्पिभिः कारयन्ति, ते नराणां कुम्भा दिव्यकुम्भेष्वनुविशन्ति, तेन प्रभुः दिव्यशक्त्या शोभन्ते । तत सुरानीतैस्तीर्थजलौषधिमृदादिभिरिन्द्रा स्वजनाश्चाभिषिञ्चन्ति । ततो गन्धकाषायेण रूक्षिताङ्गो यथास्थानपरिहितातरणजासुरो लक्षमूल्यं सदशं वस्त्रं परिधत्ते । स्वजना एकां शिबिकां शिल्पिभिर्बहुरत्नस्तम्भशतान्वितां कारयन्ति, तादृश्या स्वर्गिकृतया शिबिकया मिश्रा सा प्रभुः शिबिका । तत षष्ठादितपसाऽलङ्कृतस्तत्र सिंहासने पूर्वाभिमुखः स्वामी निषीदति । प्रभोर्दक्षिणभागे कुलमहत्तरा उपविशेत् एकं हंसलक्षणपटशाटकं गृहीत्वा, वामभागे च धात्री निषीदति, पृष्ठे चैका तरुणी छत्रं दधाना तिष्ठति, ईशान्यामेका पूर्णकलशधरा निषीदति, एकाऽऽग्नेय्यां हस्ते तालवृन्तं धृत्वा निषीदति । तत स्वजनादिष्टा सहस्रनरा तुल्यस्वरूपां शिबिकां वहन्ति यावदिन्द्रस्तस्या दक्षिणबाहामूर्ध्वगां स्वयं वहति, ईशानेन्द्र उदीच्यां ऊर्ध्वगां बाहां वहति, चमरेन्द्रोऽधस्तनीं दाक्षिणात्यां स्वयं वहति, उत्तरामध-

स्तनीं यवींद उद्वहेत्। शेषा सुरा पञ्चवर्णपुष्पवृष्ट्यादिकं तन्वन्ति, इत्याद्यनेकमहामहैर्निर्गच्छन्त जिन सर्वे स्तुवन्ति—"हे वीतराग प्रभो ! समस्तकर्मरिपून् जित्वा शीघ्रं केवलज्ञान त्वमाप्नुहि" । एव महामहै प्राप्य वनमशोकादितरोस्तले ता सस्थाप्य तस्या समुत्तीर्य भूषणानि मुञ्चति, तानि कुलमहत्तराऽऽदायैव हित शास्ति, यत —

उच्चोच्चगोत्रस्त्व वत्स त्वमसि क्षत्रियोत्तम । तत प्रमादं मा कार्षीर्यथा सिध्येत्तवेप्सितम् ॥ १ ॥

ततो भगवानेकया मुष्ट्या कूर्चान् मुष्टिचतुष्केण च मूर्धजानुद्धरन् लोच कुरुते पञ्चेन्द्रियविषयकषाय-चतुष्टयरूपनवविधभावलोच केशत्यागरूप दशम द्रव्यलोच च चकार । शक्रस्तान् केशानादाय प्रभुमनुज्ञाप्य क्षीरोदधावुत्सृजेत् । तत शक्रो देवदूष्य लक्षमूल्य वस्त्र प्रभोः स्कन्धे न्यस्येत् । तदा शक्रवाक्येन सुरनरनार्योघरवो निखिलोऽप्युपशाम्यति । ततो "नमो सिद्धाण" इत्युक्त्वा स्वामी सर्वसामायिकपाठ वदति, अत्र पाठे भते इति जिना नोच्चरन्ति, न चास्यान्यो भदन्तः । अन्यत्र सिद्धेभ्य आचारार्थत्वनेन सिद्धत्वात्प्रत्युक्तमिति तत्त्वार्थवृत्तौ । चारित्रप्रतिपत्त्युत्तरक्षणे चतुर्थज्ञानमुत्पद्यते । आत्तसयमास्ते तस्मिन्नेवाह्नि विहरन्ति द्रव्याद्यप्रतिबन्धत्वेन । यत —

तत्र द्रव्य सचित्तादि क्षेत्र ग्रामगृहादिकम् । काल स्यान्मासवर्षादिर्भावो रागादिरुच्यते ॥ १ ॥

तत प्रभुतप पारणगृहे देवा पञ्च दिव्यानि तन्वन्ति—सुगन्धजलवृष्टि १, पुष्पवृष्टिः २, स्वर्णवृष्टि

३ स्यात्, व्योम्नि दिव्यदुन्दुभि ध्वनति ४, अहो दानमहो दानमित्युद्घोषयन्ति ५, मुदिताः सुरा नरजन्मानुमोदन्ते। स्वर्णवृष्टिरुत्कृष्टा सार्धद्वादशकोटिमिता स्यात्, जघन्या च वातखण्डमिता स्यात्।

शक्रादयस्ते खलु वर्णनाढ्या, दीक्षादिकल्याणककारणे ये।
मुख्या भवंति प्रभुसेवनेऽपि, तेषां करे मूर्धनि सच्छिवोऽर्हन्॥ १॥

॥ इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादस्य वृत्तौ चतुर्दश-
स्तम्भे २०० व्याख्यानम्॥

॥ व्याख्यानम्॥ २०१॥

अथ केवलज्ञानोत्पत्तिमाह—

आद्येऽथ शुक्लध्यानस्य ध्याते भेदद्वयेऽर्हताम्। घातिकर्मक्षयादाविर्भवेत्केवलमुज्ज्वलम्॥ १॥

स्पष्ट। अष्टधा कर्ममलं शोधयतीति शुक्लं, शोकं वा क्लमयतीति शुक्लं, तदेव ध्यानं तस्याद्ये भेद-द्वये ध्याते सति जिनानां केवलज्ञानं समुत्पद्यते। ताद्यौ द्वौ भेदाविमौ—तत्र प्रथमं पृथक्त्ववितर्क-सप्रविचारं एकद्रव्यविवर्तिनामुत्पादादिपर्यायाणां विस्तारेण भिन्नभेदैर्यो वितर्को विकल्पनं नानानयानु-सारेणात्मकात् जीवाजीवौ भिन्नत्वेन कृत्वा वितर्कौ गुणपर्यायविचारणं सप्रविचार इति आत्मसत्ताध्यानं यत्र ध्याने। आद्य एष भेदस्तु अष्टमगुणस्थानादारभ्यैकादशं यावल्लभ्यते इति। द्वितीयं एकत्ववितर्का-

प्रविचारः जीवस्य गुणपर्याया श्चात्मस्वरूपेण तिष्ठन्ति, न जिनस्वरूपेणेति ध्यायति, तथा मजीवस्तु सिद्धस्वरूपमयथैवोऽस्ति । तथा चोक्तं पूर्वे —

अनेकेषां पर्यायाणामेकद्रव्यावलम्बिनाम् । एकस्यैव वितर्को य पूर्वगतश्रुताश्रय ॥ १ ॥

मन प्रवृतियोगानामप्येकस्मात् परत्र नो । विचारोऽत्र तदेकत्ववितर्कमविचारि च ॥ २ ॥

इदं द्वेषत्र पर्याये योगचापल्यवर्जितम् । चिरमुज्ज्वलते दीप (ध्यान)निर्वातगृह(दीप)वत् ॥ ३ ॥

एष द्वितीयभेदस्तु द्वादशगुणस्थाने सञ्जयति । अनेन घनघातीनि चत्वारि कर्माणि क्षयं नीत्वा निर्मलकेवलज्ञान प्रजते सयोगिकेवलिगुणस्थाने ध्यानान्तरिका ( त ) स्यात्, तेन ज्ञानेन सर्वपदार्थाननन्तधर्मात्मकान् जानन्ति । यत —

न जानन्ति न पश्यन्ति यत्तन्नास्ति जगत्रये । अतो भवन्ति पूज्यास्ते अर्हन्तो जगदर्चिता ॥ १ ॥

इति । अथ तीर्थकृत्पदमपि केवलोत्पत्तौ सत्या भोग्यतामेतीत्याह—

यस्तृतीयभवे बद्ध तीर्थकृन्नामकर्म तत् । प्रासोदय विपाकेन जिनाना जायते तदा ॥ १ ॥

अथ केवलोत्पत्त्यनन्तर यद्देवा कुर्वन्ति तदाह—

तस्मिन्नेव क्षणे देवेश्वरा आसनकम्पतः । एत्य महामह कुर्युर्ज्ञानोत्पत्त्यास्पदेऽर्हताम् ॥ १ ॥

अर्हता ज्ञानोत्पत्तौ पूर्वरधनुःपष्टि सुरा एत्य केवलकल्याणकमह तन्वन्ति । तथाहि—वायुकुमारा योजनमितभूतलमेव शोधयन्ति । मेघकुमारास्तां जलैः सिञ्चन्ति, षड्ऋत्वधिदेवताः पुष्पैर्मही पूजयन्ति ।

व्यन्तरा रत्नत्रयमे सपादक्रोशोच्च स्वर्णरत्नमणिमय पीठ रचयन्ति। तत्र पृथ्वीतो दशसहस्रसोपाने प्राप्य रूप्यमयं वप्र हेमकपिशीर्षं भुवनेशा कुर्वते। तत्रैकैक सोपानमेकहस्तपृथूच्छ्रित। वप्रे सपादक्रोशान्तरे समुन्नय। रौप्यवप्रस्य भित्ति पञ्चशतधनुरुच्छ्रिता स्यात्, तथा त्रयस्त्रिंशद्धनुर्युक्द्वात्रिंशदङ्गुलैर्मिता पृथुता स्यात्। तत्र वप्रे पञ्चत्रिकाष्टमङ्गलान्वितानि चत्वारि द्वाराणि रचयन्ति, वप्रस्य कोणे कोणे वापीश्च। तत्र प्राच्ये द्वारे द्वारपालस्तुम्बुरसुर, दाक्षिणात्ये खट्वाङ्गी, पश्चिमे कपालि, उत्तरे जटामुकुटधारी स्यात्। आद्यवप्रस्य मध्ये समतल पञ्चाशद्धनुर्विस्तृतः प्रतर समा भूमिश्च भवेत्। अत्र सुरनरयानानि तिष्ठन्ति। तत प्रतरसमाप्तौ द्वितीयस्वर्णवप्रस्य रत्नकपिशीर्षकाद्यकृतस्य सोपानानि पञ्चसहस्राणि भवन्ति, तैस्तव्याप्यते। वप्रस्य भित्तिचतुर्द्वारादिमान पूर्ववज्ज्ञेय। तत्र पूर्वस्या द्वारेऽ अभयाङ्कुशपाणी श्वेतवर्णे जयादेव्यौ स्याता, याम्यद्वारे रक्तवर्णे विजयाख्ये देव्यौ हस्तन्यस्ताङ्कुशे, पश्चिमायां पीत पाशधरे अजिते देव्यौ, उदीच्यामपराजिते नीले मकरकरे स्याता। पञ्चाशद्धनुर्मान प्रतर। अत्र तिर्यञ्च सिंहव्याघ्रमृगादयस्तिष्ठन्ति। अत्रैशानकोणे देवच्छन्दो भवति। व्याख्यानोत्तरकाले सुरमहितः स्वामी तत्राध्यास्ते। तत ऊर्ध्व पञ्चसोपानसहस्रातिक्रमे पूर्ववद्भित्त्युच्चत्वद्वारादिमानयुक्त रत्नमयमणिकपिशीर्षकान्वितं वप्र वैमानिका कुर्वु। अत्र पूर्वस्या द्वारेश सौमो वैमानिकसुरः, याम्या दण्डपाणिर्यमो गौराङ्गो व्यन्तरामर, प्रतीच्यां रक्त पाशभृज्ज्योतिष्को वरुण, उत्तरस्या द्वारपालो धनदो भुवनपतिसुर गदाहस्तः श्यामाङ्गो भवति। रत्नवप्रस्य मध्ये पीठ समभूतलं षड्धनु शतानि एक

मोर्न च विस्तृतायत स्यात् । एतावदेव विस्तारमानमाद्यद्वितीयवप्रयोर्ज्ञेयं, तत्पार्श्वद्वयमिलनात्, तथाहि-रूप्यवप्रात् पञ्चाशद्धनुर्मितं प्रतर, ततोऽग्रे पञ्चाशदधिकद्वादशशतानि सोपानधनूषि स्यु', एव त्रयोदशशतानि धनुषामेकतो रूप्यस्वर्णवप्रयोरन्तर स्यात्, परतोऽपि तथैव, एवमुभयो पार्श्वयोर्विस्तारे समुदिते एक क्रोश षड्धनु शतानि यथोक्तमान स्यात् । एवमेवान्ययोर्वप्रयोरपि मान ज्ञेय । एव त्रयाणा वप्राणा व्यासमाने समुदिते क्रोशत्रय धनुषा अष्टादश शतानि च स्यात् । अत्र षड् वप्रभित्तय स्यु, एकैकभित्तिविस्तारस्तु त्रयस्त्रिंशद्धनूंषि द्वात्रिंशदङ्गुलानि च स्यु, तत्र धनूंषि षड्गुणानि कृतानि अष्टनवत्यधिक शतमेक स्यु, अङ्गुलानि च षड्भाग्नि द्विनवत्यधिकमेक शत स्यु, एषा चापद्वय तेषु अष्टनवत्यधिकशतधनुष्षु मध्ये नियोजित स्याच्चापद्विशती, सा प्राच्यचापराशौ अष्टादशशतात्मके नियोज्यते तदैक क्रोश, स पूर्वोक्तस्त्रिभिर्युक्तो योजनसमित वृत्त समवसरण जात । अस्मिन् समवसरणे ये चतुर्दिक्षु सोपानाना सहस्रा दश स्युस्ते योजनाद्बहि । जिनाथ स्थमहीतलाद्बाह्यसोपानपर्यन्त भूतल तु सपादैस्त्रिभि क्रोशैर्भवेत् ।

भूभागतश्च समवसरण च भवेदिदम् । तत ऊर्ध्वमूर्ध्वं सोपानरचनाभि समन्तत ॥ १ ॥

इय वृत्तसमवसरणव्याख्या ज्ञेया । किञ्चिल्लेप चतुरस्रसमवसरणस्वरूप च लोकप्रकाशतो ज्ञाप्य । अथ तृतीयवप्रे मध्यागुरुक समभूतल तस्य मध्ये मणिरत्नमय पीठमेक जिनदेहोच्चत्वसमोच्छ्रय चतुर्द्वार

च कुर्वन्ति। तत्र सूर्योदये स्वर्णकमलेषु क्रमेण पादौ स्थापयन् पूर्वद्वारेण समवसरणे प्रविश्य चैत्यवृक्ष प्रदक्षिणीकृत्य पादपीठन्यस्तपादो "नमस्तीर्थाय" इत्युक्त्वा सिंहासने निषीदति। यतः—

तीर्थं नाम श्रुतज्ञानं यच्च सङ्घश्चतुर्विध। आद्यो वा गणभृत्तेन तीर्यते यत्र नाम्बुधिः ॥ १ ॥

श्रुतज्ञानपूर्विका अर्हन्तः, तदभ्यासेनार्हन्नामकर्मप्राप्तेरिति।

अर्हत्त्वपूर्विका यस्मात् पूजितपूजकः। लोकेऽप्यर्हत्पूजितत्वात् पूजयेत्तीर्थमादरात् ॥ २ ॥

ततस्तीर्थं नमस्यन् कृतकृत्योऽपि वा यथा। धर्मं कथयति स्वामी तथा तीर्थं नमस्यति ॥ ३ ॥

तत्र निषण्णो जिनो देशनां विधत्ते, येन केन वचसा नृणामपि संशयाश्छिद्यन्ते। यत —

कषायदग्धानामसङ्ख्याताञ्शुष्मताम्। असङ्ख्येनापि कालेन नेत् कथमनुग्रहः ॥ १ ॥

शब्दशक्तेर्विचित्रत्वात् सन्तीदृशि वचांस्यपि। प्रयुक्तैरुत्तरं यैः स्याद्युगपद्भूयसामपि ॥ २ ॥

अथास्मिन्नर्थे लौकिकं ज्ञातमिदं—सगरग्रामे धनकणकधनाढ्यो गुडणाहुः आभीरः। तस्य पुष्पवतीप्रमुखा पञ्चदश नार्यः, सर्वाः स्नेहाढ्याः। एकदा तत्पतिर्गाश्चारयितुं वने गतः। मध्याह्ने भोजनाय स्थितः। तदा स्वस्वभीष्टिविलोकनोत्सुकाः पतिपार्श्वं आजग्मुः। ताः सर्वा अपि क्रमेण पतिमजिदधिरे—कदम्ब हिमघटिका प्रयसी राज्ञा १। कथमद्य तक्रे मधुरिमा लोकः २। सा सश्मश्रुका स्त्री (कथ) हृदे वर्तते ३। अद्य कथं तव समाधिरस्ति? ४। अद्य कट्टोदकशाकं कथमदत्त पाचितं ५। कथमियं दुरी पुष्पुरापने ६। सा महिषी गर्जन्ती कथं न जाता ७। इयं पुरे दृश्यमाना स्त्री पान्या मार्गे

...नि, तां विना न कर्मक्षयकारिणी १२। अत्र यागमीरे निह्नपादिर्नास्ति तेन भय न ...भूनि पञ्चानीत्यत्र पाश्रिरगत ... ना नास्तीति कथ गृह्यन्ते १४। एता अजा गणिता ... तेनादत्ता पूरणीनामजानां पाश्रि प्राप्तो नास्तीति १५। इत्येकेनोत्तरेण सर्वा ... मधोत्तरं बुबुधु। ... नव् पतिरपि मुमुदे। इति प्राकृतजनेषु यदीदृशी शक्ति ... सर्वेषां ... कथ न स्यात्?। यत —

... युगपज्जनानाम्।
श्रुत्वा ... जिनेन्द्र स्यात् किमु तत्र चित्रम् ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादमन्यवृत्तौ
चतुर्दशस्तम्भे २०१ व्याख्यानम् ॥

---

## व्याख्यान ॥ २०२ ॥

अथ देशनामनर्थं पञ्चरति तदाह—

...स्वकुक्ष्या ये दीक्षा गृह्णन्ति ते मुदा। तेषु गणिपदादीन् यच्छन्ति श्रीगुरुदी जिनाः ॥ १ ॥
... ते ऽपि ... । कुर्वन्ति ... गणान् ॥ २ ॥

सूत्रं गणधरा एव भन्त्येते महाधियः । दिशन्ति केवलेनैव प्रायोऽर्थास्तीर्थपाः पुनः ॥ ३ ॥

नवरं भव्योपकाराय सूत्रं गणेशा रचयन्ति। यथा कश्चिन्नरः सहकारारूढोऽधस्थानामुपकाराय फलाना वृष्टिं कुरुते, तदा केचन पतन्ति तानि पटेन गृह्णन्ति, ततः स्वमन्यांश्च प्रीणयन्ति, तथैव जिना ज्ञानकल्पद्रुममौलिस्थिता भव्यहितायार्थान् वर्षन्ति, तन्मध्ये किञ्चिद्गणेशा धिषणापटेन गृह्णन्ति, रचितैस्तैरात्मानं परांश्चानुगृह्णन्ति । यतः—

यथा फलानि पक्वानि न सर्वानुपकुर्वते । कृतार्था न तथैवार्थाः स्युः सूत्ररचनां विना ॥ १ ॥

अथ समवसरणे प्रभो कति रूपाणि भवन्तीत्याह—

मूलरूपं प्रभोः प्राच्यामन्यत्रिदिक्षु नाकिनः । तन्वन्ति जगत्तुल्यं तन्महिम्नैव तद्वयम् ॥ १ ॥

स्पष्टं । नवरं शेषदिक्षु अर्हद्बिम्बानि स्वर्गिणो रचयन्ति, परं जना अकृत्रिमं कृत्रिमं वा न जानन्ति मूलस्वरूपाद्विसदृशं न स्यादिति । तथा तानि कृत्रिमाण्यपि जिनतुल्यबिम्बानि जिनप्रभावेणैव भवन्ति, अथ यथा सर्वे सुरा मन्दाद्यपि जिनाङ्गुष्ठप्रमितं रूपं सर्वशक्तितोऽपि कर्तुं न क्षमाः । यदाहुश्च—

यैः शान्तरागरुचिभिः परमाणुभिस्त्वं निर्मापितस्त्रिभुवनैकललामभूत ।
तावन्त एव खलु तेऽप्यणवः पृथिव्यां, यत्ते समानमपरं न हि रूपमस्ति ॥ १ ॥

प्रतिरूपवर्णनमावश्यकनिर्युक्त्यामपि कृतं । तथाहि—वाचामगोचरादर्हतां स्वरूपादनन्तगुणहीनं

---

१ गणधरानिन्य ।

मूत्स्यर्गा, तेभ्यश्चाहारकदेहा अनन्तगुणहीना, तेभ्योऽप्यनुत्तरसुरा अनन्तगुणहीना स्वरूपत, ततोऽधोऽधः क्रमात् सुरा ग्रैवेयकसुरान् यावत्, तेभ्यश्चक्रिणो वासुदेवा बलदेवा महामाण्डलिका क्रमादनन्तगुणहीना ज्ञेयाः । तच्छेषास्तु नृपादय सर्वेऽपि लोका मिथ स्वरूपत षट्स्थानपतिता भवन्ति । यत उक्त च—

अनन्ता १ सख्य २ सख्येय ३ भागहीना परस्परम् । सख्येया ४ सख्येया ५ नन्त ६ गुणहीनाश्च रूपत ॥ १ ॥

तथा तीर्थंकरस्वरूप सर्वेषा वैराग्यजनक स्यात्, न तु रागादिवर्धक चेति । अथ समवसरणे पर्षदा स्थानान्याह—

द्वादश पर्षद सर्वा देशनाश्रवणस्पृहा । स्वस्वस्थाने निषीदन्ति प्रशस्तयोगभासुरा ॥ १ ॥

स्पष्ट । पर्षन्निषीदनस्थानान्यमूनि, तथाहि–ज्येष्ठोऽन्ये च गणभृतो जिनपार्श्वे आग्नेय्या निषीदन्ति, केवलिनस्तु जिनांस्त्रि प्रदक्षिणीकृत्य तीर्थनमस्कृतिं कृत्वा स्थितेर्गौरव रक्षन्त षट्स्थाना गणभृता पृष्ठतो निषीदन्ति, जिन न वन्दन्ते, यत —

कृतकृत्यतया वाहच्छद्मत्वाच्च जिनेश्वरान् । न नमस्यन्ति तीर्थं तु नमन्त्यर्हन्नमस्कृतम् ॥ १ ॥

उक्त च धनपालेन ऋषभस्तोत्रे—

होइ मोहच्छेयं तुह सेवाए धुवत्ति नेदामि । ज पुण न वदिज्जासि तत्थ तुमं तेण झिज्झामि ॥ १ ॥

केवलिना पृष्ठतः शेषसाधवोऽतिशयिनोऽर्हत्तीर्थगणाधिपादिकाश्रद्धा यथाक्रम विनयेन निषीदन्ति,

तेरा पृष्ठतो वैमानिकदेव्योऽर्हदादिकान् प्रणम्यासते, तासां पृष्ठे साध्व्य उत्थेतास्तिष्ठ पर्यन्तेऽग्निकोणे निषीदन्ति पूर्वद्वारेण प्रविश्यार्हत्प्रदक्षिणा कृत्वा च । भुवनपतिज्योतिर्व्यन्तराणां देव्य इति त्रय याम्यद्वारेण प्रविश्य नैरृत्या दिशि तिष्ठन्ति । भुवनपतिज्योतिर्व्यन्तरसुरा पश्चिमद्वारे प्रविश्य वायव्यां दिशि तिष्ठन्ति । वैमानिकसुरा नरा नार्यश्चोत्तरद्वारे प्रविश्यैशानकोणे निषीदन्ति अर्हदादिकान्नत्वेति । चतुर्दश्य साध्व्यश्चोऽग्रगा शृण्वन्ति । सर्वे देवा नरा नार्यं श्रमणाश्च निविष्टा शृण्वन्ति, वृत्तानानस्य कस्येद यास्त्समुष । पूर्णां घोतकटिकासना साधव शृण्वन्ति, साध्व्यो वैमानिकाङ्गनाश्चोर्ध्वस्थिता । नाङ्गज्ञानजनगामीना मोपानाघारोहता श्रमो व्याधिश्च प्रतुमजाराश्च जनेत्, न कस्यापि वैरजार प्राडुर्भवति । द्वितीयवप्र निस्मृतनाल्यादिवैरास्तिर्यञ्च शृण्वन्ति इति । अथ देशनान्त यत्कुर्वन्ति तदाह—

प्रथमा पौरुषी यावद्धर्ममाख्याति पारग । वर्धापनविधि तत्र तन्वन्ति तत्कुर्वजना ॥ १ ॥

व्याख्या । जनाश्चक्रवर्ती श्राद्धा वा पूर्जनादयो वा तत्कुर्वं शान्तिकर्णवर्धापनविधिं कुर्वन्ति, तथाहि—कउमनाडीना तत्कुत्वा चहामसौरजा निस्तुषाश्च मितविशोऽश्मणकाश्चनु प्रस्थमिता आढकमाना उज्वालिता शाधिता तानर्धम्बिवानिमान् रत्नस्थाले निक्षिप्य मज्ञिनाग्निउ-सन्नारा सुवासिनी सौरिधन, अत्र स्थगिण सुगन्धिकच्चाति क्षिपन्ति, तेनासौ नवित्रजैर्मारम्यो जायत । ततो गीततूर्यादिभिर्हासरपुरस्सर श्राद्धन प्रनोरथे नीयते, यत्रिरन पूर्वद्वारा प्रविशति । तस्मिन् पात्र आगते जिन-निरमन्ति । तत स चक्रवर्त्यादिश्राद्धो वहिना सह त्रिः प्रदक्षिणा ...

स्थित्वा सर्वासु दिक्षु त वलिं प्रौढमुष्टिभि[1] किरति, तस्यार्ध भूमिपतनात्प्रागेव नाकिनो गृह्णन्ति, शेष-स्यार्धस्यार्धमेतद्विधायको गृह्णाति, अन्ये जना अवशिष्टं यथालाभ गृह्णन्ति । तस्यैककणे मूर्ध्नि न्यस्ते रोगा सर्वेऽपि शाम्यन्ति, षण्मासावधि नूतनरोगो नाविर्भवति । इत्थ वलिविधौ पूर्णे जिना प्रथमवप्रतोऽवतीर्य द्वितीयवप्रस्येशानकोणके देवच्छन्दक एत्यानेकदेवकृता सुख तिष्ठन्ति । ततो द्वितीयपौरुष्या नृपाद्यानीते सिंहासने पादपीठे वोपविश्य गणाधिपो धर्मोपदेशमादिशेत् । पुनः पश्चात्पौरुष्या जिना सिंहासने स्थित्वा देशना कुर्वते । इद समवसरण यत्र कदापि न जातं स्यात्तत्र चतुर्विधा देवा अमुना विधिना कुर्वन्ति । कश्चिन्महर्द्धिकसुरो नन्तुमेति स तत्रैकोऽपि कुरुते इति ।

अथ समवसरण विना नियतर्द्धिमाह—

यदापि न स्यात्समवसरण स्यात्तदापि हि । सुशोभित प्रातिहार्याष्टकं नियतमर्हताम्[2] ॥ २ ॥

स्पष्ट । नवर अष्टमहाप्रातिहार्यवर्णन तु मया प्रथमस्तम्भे लिखितमस्तीति ।

इत्यनन्तगुणरत्नशालिना–मर्हतामुदितमागमोदधे ।
वर्णन तदनुसारमर्हता, धार्मिका सुकुरुतात्मनो हिताम् ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसङ्ग्रहाख्यायामुपदेशप्रासादवृत्तौ चतुर्दशस्तम्भे २०२ व्याख्यानम् ॥

---

१ बलिस्वामी । २ योग्यताम् ।

अत्र जिनेन्द्राः समवसरणे स्थिता देशनां तन्वन्तीत्याह—

बहवोऽविरता जीवास्तेभ्यः स्तोकाः सुदृष्टयः । स्तोकतरास्ततः श्राद्धाः साधवोऽल्पतमास्ततः ॥ १ ॥

अविरता धर्मविरतिरहिता जीवा बहवः समस्तविश्ववर्तिमिथ्यात्विजीवग्रहणात् । अविरत्य अविरता [illegible] ... जीवा यथश्चेति द्वादश । तेभ्योऽ-श्रमा—समय [illegible] पञ्चानामनियमोऽनियमश्च षण्णां जीवानां वधश्चेति द्वादश । तेभ्यः श्राद्धा देशविरताः स्तोकतरा, एकादशाविरतीनाम-विरतिरीत्या [illegible] सम्यक्त्वधारिणः । तेभ्यः सर्वं नियमतया [illegible] प्रत्याख्यानपरा ते विरत्येकदेशधरा देशविरतिधरा । तेभ्यः सर्व-विरतिरता साधवः स्वल्पतमाः । अत्र भावना—इह जीवानां संसारे पतयः पङ्क्तयः सन्ति । तत्राद्यपङ्क्ते-रेकेन्द्रियाद्योऽसंज्ञिपञ्चेन्द्रियान्ताः । तत्रैकेन्द्रियाः पञ्चाश्रवेभ्योऽविरतत्वात्सञ्जनित कर्मबन्ध मनन्यमेव-गर्वेऽप्यसङ्गिपञ्चेन्द्रियाद्योऽविरतपङ्क्तावेव । तत्रैकेन्द्रिया पञ्चाश्रवेभ्योऽविरतत्वात्सञ्जनित धर्मबन्ध-मनन्त, विराधका नोच्यन्ते, यथाहि सुसमसमादिमुनितादयो विरतिपरिणामाभावाद्धर्षितेनाधमाधमेन मनसा, हिंसाश्च नोच्यन्ते । मृषादयोऽसत्यमवदन्तोऽपि न सत्यवादिनः । गुणिषुडशा-दिष्वपि न चुरन्ते तथापि व्रतिनो नोच्यन्ते । कृत्रिमाकृत्रिमागुणकालिर्यड्नरा मैथुनमगोन स्पृशन्ति न गृह्णन्ति तथापि न ते मैथुनत्यागिनः । कृत्रिमाकृत्रिमागुणकालिर्यङ्नरा मैथुनमगेन स्पर्शानं न गृह्णन्ति तथापि न ते नैष्ठिकाः । [illegible] निर्ग्रन्थाः स्युः, विरतिकर्म न माना अपि न प्रत्याख्यानि । पत्ड्मसादयश्च निरोधनस्वाध्यायान्तरायान् निर्ग्रन्थाः स्युः, विरतिकर्म न नवने । दानमेवासा अवता, समस्तानाम् । यत—"तर्गिंदिग्गुसागाणो" इति द्वितीयगुणस्थानस्या-वलम्बनात् । तथा च विरतिर्मूर्छितादिन्द्रियादिष्वप्यविरतिरिं, सास्वादनस्योत्पत्तिसमये पक्षावलिका-

मलानात् । [illegible] विरति क्रियामूर्छिताद्यनिन्द्रियादिष्वप्यविरतिरिं, सास्वादनस्योत्पत्तिसमये पक्षावलिका

घायत्ताज्ञायात्। अथैवादेषु विविधविशेषहिंसाद्याश्रवा दृश्यन्ते, तथाहि—वृक्षादय स्वस्वमाहार जलानिलादिक सचित्त गृह्णन्ति इति तेषा जलघातविराधना स्पष्टा। यत —

जत्थ जलं तत्थ वणं जत्थ वणं तत्थ निच्छिओ अग्गी। तेऊ वाऊ सहगयउं तस्सा य पच्चक्खया चेव ॥१॥

इति घनवनस्पत्यादीनामप्याहारग्रहणमात्रेणापि सूक्ष्मवृत्त्या विराधना। बादरवृत्त्या तु केचिद्वृक्षा क्षारीवदर्यादय कदल्यादीन्मरदेव्यादिजीववत् सुल्यादय स्वमूलक्षारकटुरसादिभि पृथिव्यादीन् परूपि घ्नन्ति, कीटमारिकाकिंपाकादयो मनुष्यपश्वादीन् घ्नन्ति, जेरागारिप्रमुखा उच्चाटयन्ति, केचिन्मनुष्यान् पशून् (मूल) पशूंश्च नरान् कुर्वन्ति। वंशशरादयो धनुर्बाणादिरूपतया बहुजीवान् घ्नन्ति। धनुरादिजीवानामप्युत्समाहरिरवपरिणामत्वादचेतनशरीरादेरपि बन्ध। जिनपूजार्हपुष्पफलाचरणादिमुनिपात्रादिजीवाना शरीराणा धर्मसाधनत्वेऽपि न पुण्यबन्ध, तद्धेतुविवेकाभावात्। एव महारम्भप्रवृत्तिहेतुशकटआदिजीवाना हिंसाहेतुत्व भावनीय। एव दर्शिता हिंसा १। तथा तेषा सत्याध्यवसायाभावादसत्य। अनानामसत्यवादहेतुत्वादपि असत्यपाप, दृश्यन्ते हि केचिदोपधिवशात्सत्यमसत्यमपि वदन्त। दीपालतारादी कन्याद्युक्तस्यासत्यस्यापि विज्ञापनात्। मोहनवल्ल्यादयो मोहोत्पादनेन जनाना मार्गादिवैपरीत्यादि दर्शयन्ति, इत्याद्यनेकधाऽसत्यप्रकार २। सर्वे वृक्षजीवा सचित्तमाहार गृह्णन्ति, तदाहारगतजीवादत्तमेवेति, परेषामदत्तहेतुत्व च स्पष्टमेवेति, कोकाशसूत्रधारकृतकाष्ठमयशुकपारापतादिभिर्नृपकोष्ठागारेऽस्यादानं कृत शाल्यादीना ग्रहणश्रवणात्, काष्ठशुकादिजीवाना चादत्तादानपाप पूर्वोक्तधनुर्व-

शादिवत् । श्रीपधाअनेन परधनमहणप्रवृत्तिरित्यादि ३ । एव मैथुनपाप निरतिनानानाना, तादृ पुष्पारसमादीना पर प्रति रागहेतुत्वात् । अह्निकेलादिर्निर्विशेषमैथुनप्रवृत्ति स्यात् । तथा लोके पञ्च याणा इमे–कमलकन्द १, आम्रमञ्जरी २, जातिपुष्प ३, चम्पापुष्प ४, नपोरियापुष्प ५ च, एते पञ्च मैथुनरागजनका । तथा केषाञ्चित्तरूणा साक्षादपि कामसंज्ञा दृश्यते । तदुक्तम्—

पादाहत प्रमदया विकसत्यशोक, शोकं जहाति बकुलो मधुपारिषिच ।
आश्लिष्ट कुरबक कुरुते विकास–मालोकितस्तिलक उत्कलिको विभाति ॥ १ ॥

इति ४ । परिग्रहोऽपि तेषा विरत्यजानात् । केचित्तरवो निधिं मूलेन वेष्टयन्ति मूर्छेत्यादि परिग्रह-पाप स्पष्ट । तथा तरूणा यद्यत एकेन्द्रियत्वमस्ति तथापि जात पञ्चेन्द्रियाणा सद्भाव । तथा तेषा दशसंज्ञानि कर्मबन्ध, तथाहि—

आहार १ भय २ परिग्गह ३ मेहुण ४ तह कोह ५ माण ६ माया ७ य ।
लोभो ८ रागो ९ ओहो १० एए सन्ना दस जीवाण ॥ १ ॥

रुक्खाणं जलाहारो १ सकोअणी भएण सतुअइ २ । नियततुएहिं वेढइ वल्ली रुक्खस्स परिग्गहेइ ३ ॥ २ ॥
अथीपरिरंभण कुरबस्तरणो फलति मेहूणे ४ । कोकणयस्स च कदो हुकारे मुयइ कोहेण ५ ॥ ३ ॥
माणे रुदति रुयती ६ छायइ वल्ली फलाइ मायाए ७ । लोभे विल्लपलासा खिवंति मूले निहाणुवरिं ८ ॥ ४ ॥
रयणीए संकोच (अ) कमलाण होइ रागसन्नाए ९ । ओघे चइत्तु मग्ग चडंति रुक्खेसु वल्लीओ १० ॥ ५ ॥

इति वनस्पतिमाश्रित्याविरतिर्जनिता । एवं पृथ्वीजीवानां नाश्य, हरितालसोमलक्षारादिभिर्विकलेन्द्रियतिर्यङ्मनुष्याणां प्रत्यक्ष वधदर्शनात् । पारदस्य तु कूपस्थस्याश्वारूढस्त्रीमुखदर्शनात्तामनुधावतः पात्यपिह स्पष्टमेव । शेषं प्राग्वत् । जलमपि क्षारादिविशेषैर्मधुरजलपृथ्व्यादिजीवान् हन्ति, नदीपूरादिषु त्रसपश्वादीनां महान् वधः स्यात् । अग्निश्च तापशोषणादिना जलजीवान् हन्ति सर्वतोधारशस्त्ररूपत्वात्सर्वजगद्दाहकशक्तिरस्ति, तेन प्राप्तं सर्वं हन्ति । एवं वायवोऽप्युष्णादयः शीतादिवायुजीवान् प्रदीपाद्यग्निजीवांश्च घ्नन्ति, वृक्षादिभिर्नरादीनां मृत्युदर्शनात् । एवमेकेन्द्रियाणां षष्ठाश्रवाद्यविरतित्वं ज्ञापितं । एवं विकलेन्द्रियाणामपि । यतः पूरकशङ्खादयो द्वीन्द्रिया जीवा जीवाहारं कुर्वन्ति । यूकाकीटिकामत्कुणमृगादयस्त्रीन्द्रिया जीवाहारा एव, खर्जूरादयः कर्णे प्रविष्टा उद्वेजयन्ति । चतुरिन्द्रिया वृश्चिकभ्रमरादयः ईलिकादीन् घ्नन्ति । दंशमशकादयो गजकर्णे प्रविष्टा गजं सिंहनासायां प्रविष्टाश्च सिंहं घ्नन्ति । पञ्चेन्द्रियाश्च जलचरा मत्स्यादयो मत्स्याहारा एव । स्थलचरा व्याघ्रसिंहसर्पादयोऽपि मांसाहाराः । श्येनगृध्रादयो बहुधा हिंसाकारिणः । तथा कामसेवाऽपि स्थलचरादीनां स्पष्टैव । एषा हिंसादिजनिता गतिरप्येव—

"थावर विगला नियमा संखाउअतिरियनरेसु गच्छंति" ।

तथा—"असन्नि १ सरिसिव २ पक्खी ३ सीह ४ उरग ५ त्थि ६ जंति जाव छट्ठिं ।
कमसो उक्कोसेणं सत्तमपुढविं मणुअमच्छा ॥ १ ॥"

इत्यनन्ता जीवा अविरतपङ्क्तावेव प्रविशन्ति। अथ मनुष्या जिह्वशौनिककैवर्तकचक्रिम्लेच्छादयोऽ-धर्मा। नृपामात्यादय उत्तमा अपि जैनधर्मविमुखा अविरता एव। तथा द्वीपायनादय सुरा हिंसाद्या श्रवकरा अविरता एव। तथा सुरा काञ्चनलुब्ध्याऽसत्य जल्पन्ति, अदत्तनिधानादिक परकीयमधिति-घ्नन्ति। मैथुने परकीयदेवाङ्गना कामयन्ते। परिग्रहस्तु विमानादिलक्ष्मीरपि अमितैव। एव सुरा अप्य-विरतिन। तथेश्वरो जगत्संहाराधिकारीत्यादिनाऽऽश्रवपर एव। एव कृष्णब्रह्मादयोऽपि ज्ञेया। लौकिक-र्षयोऽपि शापानुग्रहस्त्रीप्रसक्त्यादिभिरविरतपङ्क्तिगा एव। विश्वामित्रेण ब्रह्मर्षिरित्यकथनोत्पन्नक्रोधेन वशिष्ठस्यारुन्धतीकलत्रपुत्रा हता, एव सोऽपि कामलुब्ध। पाराशर स्मरविह्वलो दिवाऽपि धूमरीं विकुर्व्य (विकृत्य) मत्स्यगन्धा मात्स्यिकपुत्रीं सिषेवे। इत्यादि सर्वं परग्रन्थाज्ज्ञेय। अथान्यतिर्यङ्नरा अपि केचिद्द्रव्यतो देशसर्वविरतिभावेऽपि अविरता एव। नारका अपि क्रोधाध्माततया वैक्रियशक्त्या विकुर्वित (विकृत) प्रहरणवज्रतुण्डादिभि परस्पर महावेदनामुत्पादयन्ति इत्यविरतपङ्क्तावेव। एव चराचरजीवा बहव प्रत्याख्यानरहिता।

अथ द्वितीयपङ्क्तिरविरतसम्यग्दृष्टीना ज्ञेया। श्रेणिकसत्यकिवासुदेवादय कियन्तो मनुष्या देवनार-काणामसङ्ख्याततमो भाग तिरश्चा चानन्ततमभागेऽवतिष्ठन्ति, तथापि मिथ्यात्वदोषगतत्वेन पूर्व-भेदादतिश्रेष्ठ। केचिद्देवा सुदर्शनिनोऽत्र भेदेऽवतरन्ति, तथापि पूर्वोक्तजीवेभ्य स्वल्पा एवेति।

इति वनस्पतिमाश्रित्याविरतिर्दर्शिता । एवं पृथ्वीजीवाना ज्ञाव्यं, हरितालसोमलक्षारादिभिर्विकलेन्द्रियतिर्यङ्मनुष्याणां प्रत्यक्ष वधदर्शनात् । पारदस्य तु कूपस्थस्याश्वारूढस्त्रीमुखदर्शनात्तामनुधावतः कामचिह्न स्पष्टमेव । शेष प्राग्वत् । जलमपि क्षारादिविशेषैर्मधुरजलपृथ्व्यादिजीवान् हन्ति, नदीपूरादिषु त्रसप्रभादीना महान् वध स्यात् । अग्निश्च तापशोषणादिना जलजीवान् हन्ति सर्वतोधारशस्त्ररूपत्वात्सर्वजगद्दाहकशक्तिरस्ति, तेन प्राप्त सर्वं हन्ति । एवं वायवोऽप्युष्णादय शीतादिवायुजीवान् प्रदीपाद्यग्निजीवान् घ्नन्ति, लूकादिभिर्नरादीना मृत्युदर्शनात् । एवमेकेन्द्रियाणा पञ्चाश्रवाद्यविरतित्व ज्ञापित । एव विकलेन्द्रियाणामपि । यत पूरकशङ्खादयो द्वीन्द्रिया जीवा जीवाहार कुर्वन्ति । यूकाकीटिकामत्कुणभृङ्गादयस्त्रीन्द्रिया जीवाहारा एव, खर्जूरादय कर्णे प्रविष्टा उद्वेजयन्ति । चतुरिन्द्रिया वृश्चिकभ्रमरादय ईलिकादीन् घ्नन्ति । दशमशकादयो गजकर्णे प्रविष्टा गजं सिंहनासाया प्रविष्टाश्च सिंह घ्नन्ति । पञ्चेन्द्रियाश्च जलचरा मत्स्यादयो मत्स्याहारा एव । स्थलचरा व्याघ्रसिंहसर्पादयोऽपि मांसाहारा । श्येनगृध्रादयो बहुधा हिंसाकारिण । तथा कामसेवाऽपि स्थलचरादीना स्पष्टैव । एषा हिंसादिजनिता गतिरप्येव—

"चारर विगला नियमा मत्तायतितिरिनिरेसु गच्छन्ति" ।

तथा—"अमनि १ सरिसिव २ पक्खी ३ सीह ४ उरग ५ त्थि ६ जंति जाव छट्ठिं ।
कमसो उक्कोसेण सत्तमपुढविं मणुयमच्छा ॥ १ ॥"

॥ व्याख्यान ॥ २०४ ॥

अथ भव गृहीत जीवभेदेन चतुर्धा परिणमतीत्याह—

शालिकणसम्बन्धोऽत्र धार्यो भव्याभिधायिभिः । भवेज्जीवविशेषेण चतुर्धा भवनिस्तर ॥ १ ॥

स्पष्ट । भावार्थस्तु वक्ष्यमाणदृष्टान्ततो ज्ञेय —जम्बूद्वीपे भरतक्षेत्रे मगधाभिधो देश । तत्र राजगृह पुर । तस्मिन् पुरेऽस्ति धनाभिधः श्रेष्ठी । तस्य धारिणीति सुरूपा प्रिया । तस्याः कुक्षिसमुत्पन्नाश्चत्वार पुत्रा धनपाल १ धनदेव २ धनगोप ३ धनरक्षित ४ नामान ते यौवन प्रापुः । ततेऽत्र स धनवान् महेभ्याना कन्याभि सह पर्यणाययत् । प्रथमा उज्झिकाख्या १, द्वितीया भक्षिका २, तृतीया रक्षिका ३, चतुर्थी रोहिणी च ४ । ताभि समं सुख सेवमानास्ते गत काल देवा इव न जानन्ति । अन्यदा श्रेष्ठी निशान्ते धर्मध्यानमाधाय गृहचिन्ता चकार—"एतासा वधूना मध्ये का मम गृहनिर्वाह करिष्यति ? अत परीक्षा करिष्ये" । तत प्रात कृत्य विधाय भोजनानन्तर बान्धवपुत्रादीना समक्ष सर्वासा वधूना आकार्य पञ्च पञ्च शालिकणानक्षिमतान् समार्पयत् । आद्या सा मन्दधीर्विजने गत्वाऽचिन्तयत्— "अयं श्वशुरो विपरीतधीरभूत्, यत्स्वजनसमक्ष पञ्च शालिकणान्मे पाणावार्पयत्, त्यजामि, एतै किं प्रयोजन ? यदा याचिष्यति तदाऽपरानर्पयिष्यामि" इति विचिन्त्य त्यक्तवती । द्वितीया चिन्तयति— "श्वशुरदत्तानेतान् किमर्थं त्यजामि, अतो भुञ्जे इमान् यदा याचिष्यति श्वशुरस्तदाऽन्यान् समर्पयि-

अथास्या अप्यसङ्ख्याततमो भागो विरताविरताख्यदेशविरतिमयी तृतीया पङ्क्तिः । तस्यां हि कियन्तो मनुष्या गर्भजपञ्चेन्द्रियतिरश्चामसङ्ख्याततमो भाग सङ्ख्यातास्तिर्यञ्चश्चण्डकौशिकशालमत्स्यकामृगराजाजीर-गजादिवत् जातिस्मृत्यादिना प्राप्तश्राद्धधर्माण, नेतरे । सर्वेऽपि मिलिता 'समत्तदेसविरया पलियस्स असङ्खभागमित्ताय" इतिवचनात्पल्योपमासङ्ख्याततमभागे यावन्त समयास्तावन्तोऽमाणा लभ्यन्ते ।

तस्या अप्यसङ्ख्याततमो भाग सर्वविरतिमनुष्यमयी चतुर्थी पङ्क्तिः । उत्कर्षतोऽपि पञ्चदशकर्मभूमिषु कोटिसहस्रपृथक्त्वमितानामेव यतीना प्राप्यमाणत्वात् ।

अत्र च प्रथमा पङ्क्ति विनाऽग्रेतन्यस्तिस्रोऽपि पङ्क्तयोऽल्पतमा एव, क्रमाच्चाल्पतमा ज्ञातव्याश्च । सम्य-क्त्ववन्तो जीवाश्चतसृष्वपि गतिषु लभ्यन्ते । देशविरतिवन्तस्तु द्वयोस्तिर्यङ्नरयोर्गत्यो प्राप्यन्ते । सर्व-विरतिस्तु नरगतावेवेति ॥

वाणीमिमां भागवतीं निशम्य, कुर्वन्तु भव्या विरतौ प्रयत्नम् ।<br>
लोकोत्तरां सिद्धिगतिं हि तेन, धन्या लभन्ते द्रुतमव्ययां ताम् ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसङ्ग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ<br>
चतुर्दशस्तम्भे २०३ व्याख्यानम् ॥

---

अत्र भव गृहीत जीवभेदेन चतुर्धा परिणमतीत्याह—

शालिकणसमन्वोऽत्र धार्यो प्रतापिताविधि । भवे जीवविशेषेण चतुर्धा मतनिर्झर ॥ १ ॥

स्पष्ट । भावार्थस्तु वक्ष्यमाणदृष्टान्ततो ज्ञेय —जम्बूद्वीपे भरतक्षेत्रे मगधाभिधो देश । तत्र राजगृह पुर । तस्मिन् पुरेऽस्ति धनाभिध श्रेष्ठी । तस्य धारिणीति सुरूपा प्रिया । तस्या कुक्षिसमुत्पन्नाश्चत्वार पुत्रा धनपाल १ धनदेव २ धनगोप ३ धनरक्षित ४ नामान ते यौवन प्रापु । तदैव स धनस्तान् महे-भ्याना कन्यानि सह पर्यणाययत् । प्रथमा उज्झिकाख्या १, द्वितीया भक्षिका २, तृतीया रक्षिका ३, चतुर्थी रोहिणी च ४ । तानि सर्व सुख सेवमानास्ते गत काल देवा इव न जानन्ति । अन्यदा श्रेष्ठी निशान्त धर्मध्यानमाधाय गृहचिन्ता चकार—"एतासा वधूना मध्ये का मम गृहनिर्वाह करिष्यति ? अत परीक्षा करिष्ये" । तत प्रात कृत्य विधाय भोजनानन्तर बान्धवपुत्रादीना समक्ष सर्वासा वधूना आकार्य पञ्च पञ्च शालिकणानखण्डितान् समार्पयत् । आद्या सा मन्दधीर्विजने गत्वाऽचिन्तयत्— "अयं श्वशुरो विगतधीरभूत्, यत्सकलजनसमक्ष पञ्च शालिकणान्मे पाणावार्पयत्, त्यजामि, एतैः किं प्रयोजन ? यदा याचिष्यति तदाऽपरानर्पयिष्यामि" इति विचिन्त्य त्यक्तवती । द्वितीया चिन्तयति— "श्वशुरप्रदत्तानेतान् किमर्थं त्यजामि, अतो भुञ्जे इमान् यदा याचिष्यति श्वशुरस्तदाऽन्यान् समर्पयि-

ष्यामि"। तृतीयया चिन्तितं-"श्वशुरस्य वचसा किमपि प्रयोजनं भविष्यति, ततो रक्षाम्येतान्" इति विचिन्त्य तया कणा आभरणसमुद्गके गोपिता, प्रत्यह वीक्षते। चतुर्थी विजने गत्वाऽचिन्तयद्बुद्धिशालिनी-'मम श्वशुरो याचस्तन्निमान सर्वजनसमक्ष पञ्च शालिकणान् कारणविशेषेणैव प्रदत्तवान्, ...वर्धयामि"। तथैव इत्यनुध्याय प्रेषिताले पितुर्गृहे, भ्रातृणा चादिष्ट-"निजकणा इमेमे कणा ..."। तस्या गिरा बन्धुभिस्तथा कृत, घनागमे प्राप्ते ते पञ्च कणा उप्ता । तत —

वीजूय गता वृद्धिं शालय कणशालिन । प्रस्थस्तेषामभूदेक प्रथमे वत्सरे तत ॥ १ ॥
द्वितीये त्वाढकोऽभूत्के द्रोणा वर्षे तृतीयके । खारिशतानि तुर्ये तु पञ्चलक्षाणि पञ्चमे ॥ २ ॥

अथान्यस्मिन् दिने श्रेष्ठी स्वजनान्निमन्त्र्य पूर्वरीत्या वधू समाहूयादौ ज्येष्ठामर्थयते स्म-"वत्से ! ...पणानर्पय पञ्च"। तदाकर्ण्य तया गृहमध्यादानीय समर्पिता पञ्च कणा । तान् दृष्ट्वाऽवोचत्-"...ते मत्प्रदत्ताश्च"। तया प्रोचे-"तात ! ते प्रोज्झिता "। तच्छ्रुत्वा रुष्टः श्रेष्ठी जजल्प सर्व-...कारा पापयाऽयुक्त कृत, यन्मे दत्तास्त्यक्ता, तस्मादस्यास्त्यागसज्ञ भ्रगणादिपरित्यागकर्म ...तु"। ततो द्वितीया याचिता-"वत्से ! तान् कणानर्पय ममेदानीं"। तयोचे-"भक्षिता मया"। तत ...प्रोचे-"पचनादिष्वेषा भवतु"। तृतीया याचते स्म । तयाऽऽनीयोचे-"गृह्यता शुभाः कृता स्यन्ति ...रक्षि"। तत सा कोशारक्षणे कृता। चतुर्थी याचिता। तयोचे—"नापटाम्यर्पय, पर आनीयन्ते"।

श्रेष्ठिनोचे—"कस्मात् ?" । तयोचे—"मद्बन्धुभिस्ते बह्वो निष्पादिता सन्ति" । तत श्रेष्ठिना तया वृत्त। तयाऽऽनाय्यार्पिता श्रेष्ठिन सर्वसमक्ष। तत श्रेष्ठिना गृहस्वामिनी चक्रे, प्रोक्त च सर्वेषा—"योऽस्या श्चाज्ञा खण्डिष्यति तेन मे न प्रयोजन" । सर्वैरपि तद्वच स्वीचक्रे । ततो निश्चिन्त सन् स्वधर्मकर्मणि सावधानोऽभूत् । हे शैष्का ! जानार्थ शृणुत–यथा राजगृह तथा मानुष्य । यथा धनस्तथा गुरु । यथा वध्वस्तथा विनेया । ततो ये पञ्च शालिकणास्ते पञ्चमहाव्रतानि । यथा स्वजनवर्गस्तथा चतुर्विध सङ्घ । दान शालिकणाना यत्तन्महाव्रतारोपण । य उज्झिकासमो महाव्रत प्राप्योज्झति सोऽत्र परत्र च दु खी स्यात् । यथा द्वितीया तथाऽऽजीविकामात्रार्थ तपस्या न विधेया । यथा तृतीयया रक्षिकया रक्षितास्तद्वद्दूषणीयान्यतिचारेभ्य , रोहिणीवच्च वृद्धि नेयानि पञ्च महाव्रतानि यथा तथा कणास्तथेति । व्रतदृष्टान्ता –कण्डरीकादिवत् १, कूमकर्षिवत् २, आधुनिकवेषधारिवत् ३, मनकवालर्षिवत् ४, गौतमादिवत् ५ । एते सम्बन्धस्वामिन । इत्थ योजना कार्या ॥

शालिकणसम्बन्धोऽत्र षष्ठाङ्गे गदितो जिनै । ध्यात्वा व्रते तथा कार्य उपनयोऽस्य मानसे ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसङ्ग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ
चतुर्थस्तम्भे २०४ व्याख्यानम् ॥

तामलिप्त्यां पुर्यां तामलिनामा श्रेष्ठी । सोऽन्यदा रात्रिजागरिकायां जातलौकिकवैराग्य एवं दध्यौ— "अहं पूर्वकृतकर्मणा पुत्रकलत्रधनधान्यराजमान्यादिभिर्विपुलं सौख्यं वेदयामि, आजन्म कदापि तु लाभितः श्वासोच्छ्वासोऽपि न विहितः । मयाधुना प्रभाते जाते आहारादिदानैः स्वजनान् सतोष्य ज्येष्ठसुतं गृहभारं संस्थाप्य तमापृच्छ्य दारुमयं काष्ठपात्रं कृत्वा दीक्षा गृह्यते, यावज्जीवं निरन्तरं षष्ठं तपो दधदूर्ध्वबाहुः सूर्याभिमुखन्यस्तदृष्टिः सन् तिष्ठामि । षष्ठपारणके तत्पात्रं समादाय तामलिप्तीपुर्या-मुच्चनीचमध्यमकुलेष्वटन् भिक्षायाचनां करोमि । दाक्षिण्यजनादिरहितं कूरं भक्तं गृहीत्वा तच्चैकविंशतिवारान् वारिणोदकेन प्रक्षाल्य पश्चान्नीरसं मया भक्षणीयं" । इति विचिन्त्य प्रभाते निशाचिन्तितं सर्वं विधाय विहितस्योदरचतुर्थभागभिक्षाजनोऽव्यक्तलिङ्गं प्राणामप्रव्रज्यां च प्रतिपद्य तन्नगरी-बहिरुपकण्ठमाश्रयं(म) चकार । ततः इन्द्रं रुद्रं नृपं काकं श्वानं श्वपाकं च यं यं यत्र यत्र पश्यति तं तं प्रणमति । ततः षष्ठतपसः पारणके पुर्यां परिभ्रम्य तत्पात्रं भृत्वा भिक्षया लब्धभोजनस्य जलस्थलनभश्चरप्राणिनां भागत्रयं दत्त्वा चतुर्थभागेनैकविंशतिवारान् जलप्रक्षालितेन तृप्तिं विदधाति । सतोषवृत्त्या वैरंरीला षष्टिसहस्रवर्षाणि यावत्तपस्तपन् । तेन स बालतपस्वी शुष्कोऽस्थिचर्मावशेषो जातः । तदाऽनित्य-

१ "विरिक्तं दुस्तृतिसमिति भिक्षाजनः" इति पाठः साधुः ।

जागरिकायामिति दध्यौ—"अहं जीवनवेन गतिं करोमि, न स्वुरा, अत कस्य वलनामि शरीरं"। तत ईशानकोणे स्वदेहमित मण्डलमालिखानशन विधायात्मध्यान ध्यायति स्म। इतश्च यलिश्चञ्चा राजधान्या इन्द्रश्च्युत। तदा तत्र वास्तव्यदेवदेवीभिरिति चिन्तितं—"वयं सर्वे कुत्रचनाम्विनस्वाम-स्विनामस्वात्ततावस्य समीपे गच्छाम, अनेकयुक्तादिभिश्च प्रयोन्येन्द्रनवमाप्तिनिदानं कारयाम"। तत सर्वे स्त्रीदेवा चारित्रशकिधि नाट्य प्रदर्श्य त्रि प्रदक्षिणा कृत्वा चैवमाहु—"स्वामिन्! अस्मदीयरा-जधानीप्राप्त्यर्थं निदानं करोतु, येनेन्द्रत्व लभ्यते, अस्माभि सह दिव्यभोगान् भुंक्ष्व"। तामलिना तद्वाक्य नाङ्गीकृतं। ततस्ते श्रान्ता स्वस्थान ययु। तापसोऽपि षष्ठिसहस्रवर्षाणितपसानेन निरायु-वरशतजलपानत्यागेन पञ्चत्व प्राप्येशानेन्द्रोऽभवत्। इयता क्लेशेन स्वेपलत्व, अष्टपञ्चायत्यादनुकम्पा-परत्वाच्च। अत्र चरित्रमन्य इत्थं श्रूयते—अन्त्यावस्थाया तेन साधुरेको दृष्ट, तद्गुणप्रशसा मनसि चकार, तेन सम्यक्त्वेनेन्द्रत्व लब्ध। केचिच्च वदन्ति—इन्द्रजन्मत्यायिक स्वर्गे शाश्वतजिनबिम्बादिकं दृष्ट्वा सम्यक्त्व लब्ध। तत्त्व तु बहुश्रुता एव विदन्ति। अत्रानशिष्ट ज्ञातं च पञ्चमाङ्गादवसेयमिति।

तामलितणे तवेण जिणमए सिज्झंति सत्त जणा। अन्नाणस्स उ दोसेण तामलि ईसाणिं गओ ॥ १ ॥

इति पृच्छास्य। तयोपदेशमालाया—

सट्ठि वाससहस्सा तिसत्तखुत्तो दगेण धोएण। अणुचिण्णं तामलिणा अन्नाणतव त्ति अप्पफलो ॥ १ ॥

पृथिव्यादिषड्जीवकायवधकाना सर्वज्ञशासनपराङ्मुखाना सुबहुरपि तप क्लेशो बालतपस्विनाम-ल्पफलद स्यादिति ॥

दुष्करतप कारकतामली(लि)ना, नैव निदानं कृतमत्र तत्त्वम् ।
मुक्त्यर्थनिष्पादितसत्तपस्या—मूल्य न कार्य मुनिभिर्निदानै ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसङ्ग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ षोडशस्तम्भे षट्त्रिंशदधिकद्विशततम २३६ व्याख्यानम् ॥

## व्याख्यान ॥ २३७ ॥

अथ चत्वार उपदेशानर्हास्तेष्वाद्यो रागान्वित इत्याह—

यस्मिन् वस्तुनि सजातो रागो यस्य नरस्य स. । तदीयानपि दोषाँश्च गुणतयैव पश्यति ॥ १ ॥

स्पष्ट । भावार्थस्तु दृष्टान्तेन ज्ञेय —मगधे नन्दनस्तस्करः तस्याद्यश्रीद्वितीयश्रीनाम्न्यौ पत्न्यौ । द्वितीयश्रिया रक्त स तद्गेहेऽवतिष्ठति । अन्यदा कार्येणान्यदेशे गत्वा पश्चादागत प्रथमाया गृह एव तस्थौ । तया प्रगुणित नानाव्यञ्जनगुणोपेत भोजन परमसुन्दरमपि न बहु मन्यते, किमपि तन्मानस उक्तवाँश्च "किं भुज्यते" इति । तत उक्त—"द्वितीयश्रिया यदन्न राद्ध तदाऽऽनय

क्िमपि तद्गृहात् शाकं पर्पटं च"। साऽपि सपत्नीं शाकमयाचिष्ट। तयोक्तं—"अद्य राद्धं शुतं शाकं!"। तयाऽऽगत्योक्तं स्वामिने। पुनरुक्तं तेन—"किञ्चिदुद्धरितादिकमपि मार्गय"। पुनर्गत्वा साऽमार्गयत्। "कर्मकरेभ्यो दत्तं, उद्धरितमपि नास्ति" इति प्रत्युवाच सपत्नी। तदपि तया स्वपतये निवेदितं। पुनरित्यवदत्—"तस्याद्गृहात्किञ्चित्काञ्जिकमप्युपसमभ्यानय"। तत कषायिता सा गत्वा बहिः सद्यो व्युत्सृष्टं गोमयं तुषरचितपिष्टमिश्रं गृहीत्वा(कृत्वा)किञ्चित्सत्कृत्य "तद्गृहादानीत" इति वदन्ती ददाति निर्भयं। ततस्तत्तुष्टोऽजल्पीत्—"अहो मिष्टं! अहो स्त्रीगुणः!" इति। एव स्त्रीरक्तो यथा गुणदोषविचारणाञ्जनमया च क्वचिद्रक्तो स विशिष्टगुणदोषौ न वेत्ति, स धर्म नाप्नोति। यत —
मिथ्यात्वसङ्क्रमवान् आत्मा विपरीतदर्शनो भवति। श्रद्धत्ते न च धर्म मधुरमपि रसं यथा ज्वरितः ॥ १ ॥
इति १। अथ द्विष्टो धर्मानर्ह इत्याह—
यो यस्मिन् द्वेषमापन्नः सोऽयमानातिरेकवान्। स कुत्रापि गुणांस्तस्य दोषान् प्रादुष्करोत्यतः ॥ १ ॥
स्पष्ट। ज्ञात यद—वनवासे त्रयोदशवर्षातिक्रमे कौरवपाण्डवयोः कलहमायतिविरसं मत्वा सन्धये श्रीकृष्णो दुर्योधन प्राह पाण्डवोदितम्—
कुशस्थलं वरणस्थलं माकन्दी वारणावतम्। देहि मे चतुरो ग्रामान् पञ्चमं हस्तिनापुरं ॥ १ ॥
इत्थं पञ्चग्राममार्गणे दुर्योधनोऽवदत्—
सूच्यग्रं सुतीक्ष्णं या भिद्यते च मेदिनी। तदर्धं तु न दास्यामि विना युद्धेन केशव ॥ १ ॥

पुरोहितः प्राह—"गुरो गुरुवचः जयमनाय भवगतर च स्यात्" इत्यादिना बोधितोऽपि स नाबु-ध्यत, प्रत्युत वृषणोऽपि बन्धनायचिन्तयत्। एव ज्ञानतोऽपि प्रत्युतोपदेष्टुरनर्थाय क्लिष्टो जयति, बहु-बाहुगुरु प्रति वराहमिहिर इव जमाक्रियोटिकसहस्रमल्लमल्लविपुत्रादयो दृष्टान्ता स्वयमभ्यूह्या २।

अथ मूढस्तृतीय उपदेशार्ह इत्याह—

अज्ञानोपहतचित्तः कार्याकार्याविचारकः। मूढ स एव विज्ञेयो वस्तुतत्त्वमवेत्तृक ॥ १ ॥

वक्त्र। नानार्थस्तु ज्ञातेन ज्ञेय। तद्यथा—एकस्मिन् पुर एका स्त्री विधवा कष्टेन दिनान्निर्गम-यति। इतश्च वृद्धिं गतेन पुत्रेण सा पृष्टा—"मदीयपितु काऽऽजीविका आसीत्?"। तयोक्त—"राज-सेवा"। ततोक्त—"अहमपि ता करोमि"। तया प्रोक्त—"पुत्र! दुष्कराऽसौ, महता विनयेन क्रियते"। स उवाच— कीदृश पुनरसौ विनय ?"। तयोक्त—"सर्वस्यापि दृष्टस्य ज्योत्कार्य, नीचैर्वृत्त्याऽ-स्थापि जाप्य'। "एव करिष्यामि" इत्यभ्युपगम्य चलितोऽय राजसेवार्थं। मार्गे हरिणेष्वागच्छत्सु वृक्ष-गुप्ते व्याकृष्टधनुर्यष्टयो निलीना व्याधा दृष्टा। तेषा च तेन महता शब्देन ज्योत्कार कृत। तत-स्त्रस्ता मृगा पलायन्त। व्याधै कुट्टयित्वा बद्धोऽसौ। ततस्तेनोक्त—"जनन्याऽह शिक्षितो दृष्टस्य सर्वस्यापि ज्योत्कार कार्यं"। ततश्च ऋजुरयमिति ज्ञात्वा मुक्तस्तै, शिक्षितश्च, यथा "ईदृशे दृष्टे निलीने मौनेनागम्यते"। एतदभ्युपगम्य पुरतो गन्तु प्रवृत्तोऽसौ। दृष्टाश्च वस्त्राणि क्षालयन्तो रजका। तेषा वस्त्राणि तस्करैर्नित्यमपह्रियन्ते। ततस्तत्र दिने लकुटादिहस्ता रजकाः प्रच्छन्नमुपविष्टा हेरयन्तस्तिष्ठन्ति।

आगतश्चासावजल्पन्नवनतगात्रो निलीयमानः शनैः शनैः। तत्र स एष चौर इति मत्वा ताडयित्वा बद्धोऽसौ रजकैः। सद्भावे च कथिते मुक्तः शिक्षितश्च यथा ईदृशे कस्मिंश्चिद्दृष्टे एवमुच्यते यथा उप शारोऽत्र पततु। इदं चाभ्युपगम्य प्रवृत्तः पुरतो गन्तुम्। दृष्टं क्वचिद्ग्रामे नङ्गुनिर्मज्जने प्रथमं हलवाहनस्य दिवसकरणं क्रियमाणम्। ततः उक्तं उपमित्यादि। ततस्तैरपि ताडितः। सद्भावे च ज्ञाते मुक्तः शिक्षितश्च यथेदृशे क्वापि दृष्टे प्रोच्यते यथा गन्त्र्योऽत्र भ्रियन्तां, बहत्र जायतु, सदैवेदमस्त्विति। अभ्युपगतं च तेनेदम्। अन्यत्र च मृतके बहिर्नीयमाने प्रोक्तमिदं, तत्रापि बद्धः, सद्भावे उक्ते मुक्तः शिक्षितश्च "मा भून्मा भूज्जनता कदापीदृशा" इति। एतच्चान्यत्र विवाहे प्रोक्ते तत्रापि ताडयित्वा शिक्षितः। एवं स्थाने स्थाने कदर्थ्यमानोऽगमत्क्वचिद्ग्रामे। तत्र निःस्वठक्कुरस्य सेवाऽऽरब्धा। तत्र चान्यदा गृहे आम्लखटिकाया सिद्धाया जनानां मध्ये उपविष्टस्य ठक्कुरस्य "शीतखिका भूता त्वरया भोक्तुमयोग्या जामिनी राइयाऽऽकारणाय प्रेषितोऽस्मि" इत्युच्चैरवदत्। ततो लज्जितठक्कुरो गृहे गतः। ततो वाढं ताडयित्वा शिक्षितः यथा "नेत्थं पूत्कुर्वाणेन गृहप्रयोजनानि भण्यन्ते, किंतु वस्त्रेण मुखं स्थगयित्वा कर्णाभ्यर्णे स्थित्वा शनैः कथ्यते"। ततोऽन्यदा वह्निदीप्ते गृहे ग्रामसभायां शनैः शनैरयं गतः, समीपे स्थित्वा वस्त्रं च मुखद्वारे दत्त्वोवाच कर्णे, ततः सत्वरमाधावितो गृहाभिमुखः, दग्धं च गृहम्। ततः कुपितेन वाढं ताडितः शिक्षितश्च—"हे निर्लक्षण! प्रथममेव धूमे निर्गते जलधूलिभस्मादिकं क्षिप्त्वा महता शब्देन पूत्क्रियते"। तेनोक्तम्—"अथेत्थं विधास्ये"। ततः कदाचिद्दिवस्नातो धूपनायोपविष्टठक्कुरः,

निर्गता च पश्चाद्गणरस्योपरि आगत्भूमिशिला, दृष्टा च तेन, शिला चोत्पाट्य तदुपरि रक्षाकृतमहा-राजी जयभूम्यादिकं च, ततः पृष्टा च महद्भिः शार्दूलेति । ततोऽयोग्योऽयमिति निष्कासितो गृहात् । एवं भाग्यापि शिष्योऽपि गुरुवचनपरार्थं न वक्ति सोऽयोग्य इति ३ ।

अथ चतुर्थो पूर्वन्मुद्रादितो नरोऽयोग्य इत्याह—

परस्परमुपरीक्षायां धूर्तन्मुद्राहरणवशात् । अत्र मुग्धहानिष्टो हास्य स्याक्षोपनगर ॥ १ ॥

स्पष्टः । स नपुर गोचारणोपार्जितधन एको गोप । तन्मित्र स्वर्णकारस्त गोपं प्राह—"स्वर्णस्यैकं स्वर्णकटकमन्यच आदपार्श्वे कारय" । स प्राह—"त्वमेव कुरु" । स प्राह—

यदीच्छिपुत्रा प्रीतिं तत्र त्रीणि निवारयेत् । विवादमर्थसम्बन्ध परोक्षे दारदर्शनम् ॥ १ ॥

'ओषा आपदा स्वर्णकुरा नवन्ति" । गोप प्राह—"कटक परीक्षयिष्यामि, मच्चित्तस्थैर्यमस्ति, किं जनाः करिष्यन्ति ?' । तत स्वर्णकृता तुल्यमेवाकारि कटकयुग्म, सौवर्णमेक रिरिमय च द्वितीय । तत प्रथम स्वर्णमयं तस्य दत्त, तेन हट्टे दर्शित, वणिग्भिरुक्त—"इद हैम, इयच्चास्य मूल्य लभ्यते" । तत छन्नरक्षणार्थं स्वर्णकृता मार्गित, तेन दत्त, पुना रिरिमय शुद्धं कृत्वा गोपस्य दत्त । स मुग्धस्तत्प-रावर्तमविदन् स्वगृहे मुक्तवान् । पुन कार्ये उत्पन्ने वणिग्भ्यो दर्शित । तै रिरिमय प्रोक्त । गोप प्राह—"पूर्वं युष्माभिरुक्तमासीत्, पूर्वं युष्माभिरेव शुद्धमुक्त अतो मध्यस्थे न कोऽपि दोषो विद्यते । पर पूर्वं

स्तंभ. १

॥१४४॥

व्युद्ग्राहितो युक्तमयुक्तं वा न वेत्ति, तथैव च उद्युतिव्युद्ग्राहित सोऽपि यथास्थितं परमात्मवचनं न वेत्ति ४ ॥

सिद्धान्तश्रवणेऽयोग्याश्चत्वारोऽमी प्रकाशिता । हित्वाऽतस्तान् सुधीभिस्तु श्रोतव्यं श्रुतमद्भुतम् ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशमालायामन्यवृत्तौ षोडशस्तम्भे सप्तत्रिंशदधिकद्विशततमं २३७ व्याख्यानम् ॥

॥ व्याख्यान ॥ २३८ ॥

अथ स्याद्वादमतवाद्यो नरः सद्वादः कार्य इत्याह ( गाथमनिद्धनम्यर्थं )—

स्याद्वादयुक्तितो बोधं न प्राप्नुवान् स निर्गुण । विद्वन्मरावस्तन्यो वाद्य कार्यं शुजात्मन्ति ॥ १ ॥

स्पष्टः दशपुरे तोसलीपुत्रशिष्या । आर्यवज्रस्वामिपार्श्वेऽधीतानि साधिकानि नव पूर्वाणि यै, तथा स्वल्पमतिशिष्यान् ज्ञात्वा क्रमेणानुयोगा यै पार्थक्येन स्थापिता, तथा सीमन्धरवचसा निगोदपृच्छायां च शक्रेणवन्दिता, ईदृशा आर्यरक्षितसूरयो विचरन्तो दशपुरे आगता । इतश्च मथुरायां नास्ति-

१ धारयितव्य इत्यथ ।

क्वादी समुत्थित'। तत्र च प्रतिवादिनः कस्यचिदभावात्सर्वसङ्घेनार्यरक्षितसूरय एव साम्प्रतं युगप्रधाना इति कृत्वा प्रस्तुतव्यतिकरकथनाय साधुसङ्घाटक. प्रेषित.। सूरयो वृद्धत्वाद्गन्तुमक्षमा वादलब्धिधर गोष्ठामाहिल प्रैषयत्। तेन तत्र गत्वा निगृहीतोऽसौ वादी। तत' श्रावकैस्तत्रैव चतुर्मासीं कारित। इतश्च सूरयो निजायु प्रान्तमासन्न विज्ञाय दध्यु —योग्यस्यैव विनेयस्य गणधारिता देया, यत —

गृहो गणधरसद्दो गोयमाईहिं धीरपुरिसेहिं। जो त ठवइ अपत्ते जाणतो सो महापावो ॥ १ ॥

पदयोग्यस्तु दुर्बलिकापुष्पमित्र एवास्ति, शेषस्तु साधुवर्गो मम मातुलं गोष्ठामाहिल वाऽनुज फल्गुरक्षित वा समीहते। ततश्च सर्वमपि तीर्थमुपवेश्य सबोधयन्ति। तद्यथा—इह किल त्रयो घटाः, तत्रैको वल्लाना, द्वितीयस्तैलस्य, तृतीयस्तु घृतस्य। तेषु चाधोमुखेषु कृतेषु वल्ला सर्वेऽपि निर्गच्छन्ति, तैल तु किञ्चिद्घटस्य लगति, घृत तु बहुतर लगति। तदह दुर्बलिकापुष्पमित्र प्रति सूत्रार्थोभयमाश्रित्य वल्लघटकल्प सजात, मत्कृतसमस्तयोरपि तयोस्तेन गृहीतत्वात्। फल्गुरक्षित प्रति तैलघटतुल्योऽह सपन्न, सर्वयोरपि सूत्रार्थयोस्तेनागृहीतत्वात्। गोष्ठामाहिल तु प्रति घृतघटकल्पोऽह, बहुतरयोः सूत्रार्थयोर्मम पार्श्वेऽवस्थानात्। अत आद्य एव भवता सूरिर्भवतु"। तत इच्छाम इति भणित्वा तैः सर्वैरिद प्रतिपन्न। पक्षद्वयस्याप्यनुशास्तिं दत्त्वा सूरयो भक्त प्रत्याख्याय स्वर्गं गता'। तद्गोष्ठामाहिलेन श्रुत। ततो मथुरातः समागतेन पृष्टमनेन यथा "को गणधर स्वपदे सूरिभिर्निवेशितः?"। तत सर्वैर्वल्लघटादिज्ञातान्युक्तानि। तच्छ्रुत्वाऽतीव दुर्मनाः पृथगुपाश्रये स्थित' सूरिदोषान् जग्राह। साधून् व्युद्ग्राहयति, पश्कि

च—"किं सूरे निष्पावकुम्भकल्पस्यास्याग्रे श्रुताम्नाय गृहीत ?" । अन्यदा सूरिशिष्यो विन्ध्यनामा कर्मप्रवादपूर्वस्य चिन्तनिकां करोति, तद्यथा—जीवप्रदेशैः सह बद्धं बध्यमानमेव कर्म भवति, यथाऽकषायस्येर्यापथिकीप्रत्ययं कर्म, तच्च कालान्तरस्थितिमप्राप्यैव जीवप्रदेशेभ्यो विघटते, शुष्ककुड्यापतितचूर्णमुष्टिवत् इति । स्पृष्टं तु जीवप्रदेशैरात्मीकृतं, एतच्चैव बद्धं प्रलयकालान्तरेण विघटते, आर्द्रलेपकुड्ये सस्नेहचूर्णवत् इति । तत्र तदेव बद्धं स्पृष्टं च गाढतराध्यवसायेन बन्धनादपवर्तनादिकरणायोग्यं निकाचितमुच्यते, तच्च कालान्तरेण विपाकतोऽनुभवमन्तरेण प्रायो नापगच्छति, गाढतरबन्धत्वात्, आर्द्रकुड्यलिप्तनिबिडश्लेषितकर्दमवदिति । अत्र च त्रिविधोऽपि बन्धः सूचीकलापोपमानाज्ज्ञातव्यः, तथा गुणवेष्टितसूचीकलापोपमं किल बद्धमुच्यते, लोहपट्टसूचीसङ्घातसदृशं तु बद्धस्पृष्टं स्यात्, बद्धस्पृष्टनिकाचितं तु अग्नितप्तघनाहतकोट्टितसूचीनिचयसदृशं भाव्यं । ननु निकाचितस्यानिकाचितस्य च कर्मणः को विशेषः ? उच्यते—इह कर्मविषयाण्यष्टौ करणानि भवन्ति । उक्तं च कर्मप्रकृतिग्रन्थे—"बंधणसंकमणुव्वट्ट०" तदेतान्यपवर्तनादीनि सर्वाण्यप्यनिकाचिते कर्मणि प्रवर्तन्ते, निकाचिते तु विपाकेन प्रायोऽनुभवनमेवेत्ययमनयोर्विशेषः । तथापि तीव्रोत्कृष्टतपसोत्कृष्टाध्यवसायवशेन च "तवसाउ निकाइयाण वि" इति वचनान्निकाचितेऽपि कर्मण्यपवर्तनादिकरणप्रवृत्तिर्भवतीति प्रायोग्रहणं । तदत्र व्याख्याने गोष्ठामाहिलेन ... च जीवप्रदेशैः सह कर्मसम्बन्ध इति विन्ध्यसमीपे श्रुत्वा स्वाभिनिवेशेन विप्रतिपन्नो माहिल आह—ननु सदोषमिदं व्याख्यानं जीवकर्मणो

स्तादात्म्यसंबन्धोऽविभागेन जीवप्रदेशवत्, तदा सर्वदैव जीवाना सकर्मकत्वान्मोक्षाभाव, तस्मान्मदीय
मस्य गुरु—यथा कर्म स्पृष्ट सर्पकञ्चुकवत् स्पर्शनमात्रेणैव संयुक्त, अथ बद्ध बद्धय पिण्डादिन्याये-
नाखोडीभूतमेव जीव समन्वेति—अनुगच्छति, एव मोक्षापत्ते । इति श्रुत्वा जातशङ्को विन्ध्य सूरि
पमत । सूरय प्रोचु—"प्रागुक्त तदेव तथ्य । यत —

जीवो हि स्वावगाहाभिव्याप्त एवाम्बरे स्थितम् । गृह्णाति कर्मदलिक जातु न त्वन्यदेशगम् ॥ १ ॥
अथात्माऽन्यप्रदेशस्थ कर्मादायानुवेष्टयेत् । यद्यात्मान तदा तस्य घटते कञ्चुकोपमा ॥ २ ॥"

इति गुरूदित विन्ध्येन माहिलायोक्त । तेन नाङ्गीकृत । गुरुणा स्वयमाभिमुख्येनेत्थ चोदित —
त्वया किं कञ्चुकवत्स्पृष्ट कर्म प्रतिप्रदेश प्रवृत्त सदुच्यते? आहोश्विज्जीवपर्यन्ते त्वक्पर्यन्त एव प्रवृत्तं स्पृष्ट-
मिष्यत ? इति द्वयी गति । यदि आद्य पक्षस्तर्हि जीवे सर्वगत कर्म प्राप्नोति नभोवत्, कुत ? तस्य
जीवस्यान्तराल मध्य तस्यानवस्थात, न हि प्रतिप्रदेशे प्रवृत्ते कर्मणि जीवस्य कोऽपि मध्यप्रदेश उद्ध-
रति यत कर्मणस्तत्रासर्वगतत्व स्यात्, एव सति साध्यविकलत्वात्कञ्चुकदृष्टान्तोऽसबद्ध एवाप्नोति । अथ
द्वितीय पक्षो जीवस्य यदि त्वक्पर्यन्ते प्रवृत्तत्वात्कञ्चुकवत्स्पृष्टं कर्मेष्यते तर्हि भवान्तरान्तर सकाम-
तोऽन्तराले तन्नानुवर्तते बाह्याङ्गमलवत् । भवत्वनुगमाभाव:, को दोष ? (इति चेत्) एव सति सर्वेषा
मोक्ष: स्यात्, संसारहेतुकर्मणोऽभावात्, इत्यादयोऽनेके दोषा आपतन्ति । आह—ननु जीवकर्मणोर-

विज्ञागस्तर्हि तद्वियोगजाय कथ स्यात्? गुरराह—कर्मणो जीवेन महाविनागेन स्थिताणि कायनो पयोरिव विमोचन—वियोगो ज्ञानक्रियाभ्या क्रियते, यथा तस्यैव कर्मणो मिथ्यात्वादिनिमित्तान—ग्रहण जीवेन सह सयोगो विधीयते। इत्यादिना बोधितोऽपि स्वाभिनिवेश न जहौ। अथैकदा विन्ध्य-साधुर्नवमपूर्वे मुने प्रत्याख्यानमेवमवर्णयत्—यावज्जीव सर्वप्रत्याख्यान त्रिविधत्रिविधेन विधेय। इति श्रुत्वा माहिलो जगाद—ननु प्रत्याख्यान सर्वमपि यावज्जीवादिपरिमाण विना कार्य, अवधिगदित तु आशसादिदोषदूषित भवेत्, यथा पूर्णे प्रत्याख्याने देवलोकादौ गुराङ्गनागभोगादिभोगानह सेविष्ये, परिणामेऽशुद्धं प्रत्याख्यानमशुद्ध, यत सूत्रे—

रागेण च दोसेण च परिणामेण च न दूसिय ज तु। त खलु पच्चक्खाण भावविसुद्ध मुणेयव्व॥ १॥

अत्र गुरुरुत्तरमाह—याऽऽशसा सा किं पालमानाज्जायते? अथ वान्यथा?। यद्याद्य पञ्चमदि पौरुष्यादिपदोच्चारणेऽपि आशसा स्यात्, यथाप्रत्याख्याने यामादिकालमान प्रत्यक्षं प्रोक्त। अथ तत्रापि तत्पद नो वाच्यमिति, तदा प्रव्रज्यादिवत एवानशनापत्तिर्भवेत्, जिनैस्तु तपस्विना सिद्धान्ते दशधाऽनागतादिक प्रत्याख्यान कर्तव्यत्वेन कथित। अथ वान्यारूपो द्वितीयो विकल्प सोऽपि न युज्यते, यतो मुनेरवधसेवाशाऽन्यभवे न विद्यते, अवधिं विनाऽपरिमाणे प्रत्याख्याने क्रियमाणेऽनागत-काल सर्वोऽपि प्रत्याख्यानगोचर, तदा चायु क्षयाद्देवभव प्राप्तस्य यते सावद्यसेवनेऽवश्य व्रतभङ्ग

यावज्जीवं, यत आशंसादोषरहितत्वेन कालावधिकं प्रत्याख्यानं न दोषाय कायोत्सर्गनिदर्शनेन। एवं युक्तिभिः प्रज्ञापितोऽपि यावदसौ न किमपि श्रद्धत्ते तावत्पुष्पमित्राचार्यैरन्यगच्छगतबहुश्रुतस्थविराणामन्तिके नीत। ततस्तैरप्युक्तोऽसौ—यादृशं गुरवः प्ररूपयन्ति आर्यरक्षितसूरिभिरपि तादृशमेव प्ररूपितं, न हीनाधिकं। ततो गोष्ठामाहिलेनोक्तं—"किं यूयमृषयो जानीथ? तीर्थकरैस्तादृशमेवोक्तं यादृशमहं प्ररूपयामि"। ततः स्थविरैरुक्तं—'मिथ्याभिनिविष्टो मा कार्षीस्तीर्थकराशातनां, न किमपि त्वं जानासि"। तेन न स्वीकृतं। ततः सर्वेण हि सङ्घेन देवताऽऽह्वानार्थं कायोत्सर्गो विहितः। ततो भद्रिका काचिद्देवता समागता, सा वदति—"आज्ञां ददातु, किं करोमि?" ततः सङ्घः प्रस्तुतमर्थं जानन्नपि सर्वजनप्रत्ययनिमित्तं ब्रवीति—'महाविदेहं गत्वा, तीर्थंकरं पृच्छ—किं सङ्घो यत्प्रज्ञापयति तत्सत्यं उत यद्गोष्ठामाहिलो वदति तत्सत्यं?'। ततस्तया प्रोक्तं—"मम महाविदेहे गमनागमनं कुर्वन्त्याः प्रत्यूहविघातार्थमनुग्रहं कृत्वा कायोत्सर्गं कुरुत, येनाहं गच्छामि'। सङ्घेन तथैव कृतं। साऽपि तत्र गत्वा पृष्ट्वा चागता ब्रवीति 'सङ्घं तीर्थंकरं समादिशन्ति—श्रीवीरमुक्तिप्राप्तेश्चतुरशीत्यधिकपञ्चशतवर्षेष्वतीतेषु सप्तमो निह्नवो भवी, सोऽयं माहिलो मिथ्यावादी'। एतच्छ्रुत्वा माहिलो जगौ—"अल्पर्द्धिकेयं वराकी नामैतस्या न तत्र गमनशक्तिः" इति। एवमपि यावदसौ न किञ्चिन्मन्यते तावत्सङ्घेन बाह्यः कृतः। अनालोचिताप्रतिक्रान्तश्च कालं गतः॥

तथापि न तन्मतमत्यजन्त, चकार गोष्ठोऽपि बहिःसमुद्गात्रम् ।
व्युद्ग्राहयन् सोऽपि जनानशेषान्, यन्नाम नूनं गतबोधिरत्न ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ गोष्ठामाहिलनेऽष्टात्रिंशदधिकद्विशततम २३८ व्याख्यानम् ॥

---

## व्याख्यान ॥ २३९ ॥

अथ बोटिकवक्तव्यतामाह—

स्वल्पमात्रजिनप्रोक्तवचनोत्थापकारिणः । जमालिप्रमुखा ज्ञेया निह्नवाः सप्त शासने ॥ १ ॥
अथ सर्वविसंवादी निह्नवः प्रोच्यतेऽष्टमः । श्रीवीरमुक्तेर्गताब्दशते षड्भिर्नवोत्तरे ॥ २ ॥

स्पष्टौ । अष्टमनिह्नवजातं चेदं—रथवीरपुरे शिवभूत्याख्यः क्षत्रियः सहस्रयोधी । तत्र राजसेवां कुर्वति नृपो दध्यौ—"अस्य वीर्यादिगुणान् परीक्षेऽहम्" । ततः श्यामचतुर्दश्यां पशुमेकं वारुणीं च तस्य दत्त्वैवं प्रोक्तः—"त्वमेकाकी निशीथे प्रेतवने बलिं दत्त्वा समागच्छ" । स रात्रौ तत्र गतः । अनेकभूतप्रेतानीकानि, परं रोमोद्गमोऽपि नास्य जातः । नृपस्तं शूरमनुष्यं मत्वा वृत्तिं ददौ । एकदा पार्थिवेन मथुरापुरग्रहणार्थं सद्भटनरा प्रेषिताः, तत्र मथुरान्तरजयार्थमेकः शिवभूतिः प्रेषितः, स द्वयोर

जिताऽऽगात्। तत. सहस्रमल्ल इति नाम कृत्वा नृपो "वरं याचस्व" इति त प्राह। सोऽप्यूचे—"हे प्रभो! मम स्वातन्त्र्यं देहि"। नृपेण दत्ते स राजप्रसादाद्विलासान् कुर्वन् नगरमध्ये पर्यटति। रात्रौ स प्रहरद्वयेऽतिक्रान्ते गृहमागच्छति। तत एतदीयजाया तन्मातरं जणति—"निर्वेदिताऽहं त्वत्पुत्रेण। न सदैव रात्रौ वेलाया कदाचिदप्यागच्छति, तत उज्जागरकेण क्षुधया च प्रत्यहं बाध्यमाना तिष्ठामि"। तयोक्त—"वत्से! त्वमद्य स्वपिहि, अहं जागरिष्यामि"। तत स मध्यरात्रौ समेत्य प्रोक्तवान्—"द्वारमुद्घाटय"। तत प्रकुपितया मात्रा प्रोक्त—"हे दुर्जन! यन्निशीथे यत्रैतस्या वेलाया द्वाराण्युद्घाटितानि सन्ति तत्र गच्छ"। श्रुत्वेत्यतिक्रोधपरेण पर्यटताऽपावृतद्वार साधूपाश्रयो दृष्ट, तेषा पार्श्वे तेन वन्दित्वा व्रत याचित। तैश्च राजवल्लभो मात्रादिभिरमुत्कलितश्चेति न दत्त। तत खेलमल्लकाद्रक्षा गृहीत्वा तेन स्वयमेव लोच कृत। कृष्णसूरिसाधुभिर्लिङ्ग समर्पित। कालान्तरेण कृष्णाचार्येण सह विहरंस्तत्रागात्। राज्ञा सहस्रमल्लाय रत्नकम्बलो दत्तः। तत आचार्यैः शिवभूतिरुक्त—"किमनेन साधूनामनेकपापहेतुना गृहीतेन?"। ततस्तेन सगोप्य मूर्च्छया धृत, प्रत्यहं सन्भालयति (रक्षति)। गुरुभिर्मूर्च्छितोऽयमत्रेति ज्ञात्वा तस्मिन् क्वापि गते तत्कम्बलरत्न पाटयित्वा साधूना पादप्रोञ्छनकादीनि कारितानि। ततो ज्ञातव्यतिकर कषायितस्तिष्ठति। अन्यदा सूरयो जिनकल्पिकान् वर्णयन्ति—"ते जिनकल्पिका द्विविधा, एके पाणौ भुञ्जते अन्ये तु पात्रकेऽश्नन्ति, तेऽपि प्रत्येक जिनैर्द्विधा प्रोक्ता, एके सप्रावरणा अन्ये रजोहरणा" इति श्रुत्वा शिवभूतिना प्रोक्त—"यद्येव तर्हि किमिदानी बहू-

पि परिगृह्यते ? स एव जिनकल्पः किं न क्रियते ?" गुरुर्जगौ—"भारते श्रीवीरपौत्रेण श्रीजम्बूस्वामिना सम जिनकल्पादिदशवस्तुव्युच्छेदोऽभूत्, संहननाद्यभावात्साम्प्रतमसौ कर्तुं न शक्यते एव"। ततोऽसावाह—"अल्पसत्त्वानां व्युच्छिन्नोऽसौ, न मादृशां, मादृशो हि महासत्त्वोऽधुनाऽप्यमुं कर्तुमीष्टे, मोक्षार्थिना सकलपरिग्रहस्त्याज्य एव किं पुनरनेन कषायमूर्च्छादिदोषनिधिना परिग्रहानर्थेनेति। अचेलका जिनाश्च, अतोऽचेलत्वमेव सुन्दरमिति"। ततो गुरुणा प्रोचे—"हन्त यद्येवं तर्हि देहेऽपि कषायभयमूर्च्छादयो दोषाः कस्यापि सञ्जायन्तीति सोऽपि व्रतग्रहणानन्तरमेव त्याज्यः। यच्च श्रुते निष्परिग्रहत्वमुक्तं तद्धर्मोपकरणेषु मूर्च्छा न कर्तव्येति, न पुनः सर्वथा धर्मोपकरणस्य त्यागः। अथ जिनेन्द्रा अपि सर्वथा नाचेलकाः "सव्वेऽवि एगदूसेण निग्गया जिणवरा चउवीसं" इत्यादिवचनात्"। तदेवं गुरुणा स्थविरैश्च यथोक्तादिभिर्वक्ष्यमाणाभिश्च युक्तिभिः प्रज्ञाप्यमानोऽपि तथाविधकषायमोहोदयान्न स्वाग्रहान्निवृत्तोऽसौ। किंतु चीवराणि परित्यज्य निर्गतः। ततश्च बहिरुद्याने व्यवस्थितस्य तस्योत्तरा नाम भगिनी वन्दनार्थं गता। सा च त्यक्तचीवरं तं भ्रातरमालोक्य स्वयमपि चीवराणि त्यक्तवती। ततो भिक्षार्थं नगरमध्ये प्रविष्टा गणिकया दृष्टा। ततः इयं विवस्त्रा बीभत्सामिमां वीक्ष्य "माऽस्माँल्लोकस्त्याक्षीत्" इत्यनिच्छन्त्यपि तया वस्त्रं परिधापिताऽसौ। ततः एष व्यतिकरोऽनया शिवभूतये निवेदितः। ततोऽनेन "विवस्त्रा योषिदतितरां बीभत्साऽतिलज्जनीया स्यात्" इति विचिन्त्य प्रोक्ताऽसौ—"तिष्ठ त्वमित्थमपि, न त्यक्तव्यं च त्वया वस्त्रं"। अथानेके जैनसाधवस्तं प्रतिबोधयन्ति। यस्माज्जिनैरेव

स्थानैर्वस्त्रधारणमनुज्ञातमागमे नैकान्तत । उक्त च—"तिहि ठाणेहि वत्थं धारेज्जा—हिरिवत्तिय १ दुगछावत्तिय २ परिसहावत्तियं ३" । तत्र ह्रीर्लज्जा सयमो वा प्रत्ययो निमित्त यस्य तत् । तथा जुगुप्सा लोकविहिता निन्दा सा प्रत्ययो यस्य तत् । तथा परीषहा शीतोष्णदशमशकादय प्रत्ययो यत्र तत् । इत्युपहेतवे वस्त्र धार्य ।

प्रयोगश्चात्र वस्त्रादि न दोषाय तपस्विनाम् । धर्मोपष्टम्भदायित्वाच्छुद्धाहारादिवत्स्फुटम् ॥ १ ॥

अथ त्व वदसि—रौद्रध्यान चतुर्विध प्रोक्त हिंसानुबन्धि १ मृषानुबन्धि २ स्तेयानुबन्धि ३ सरक्षणानुबन्धि ४ । तत्र हिंसाया सत्त्ववधादिरूपाया अनुबन्धः सातत्येन चिन्तन यत्र तद्धिंसानुबन्धि १ । मृषाऽसत्य तस्यानुबन्धो यत्र तन्मृषानुबन्धि २ । स्तेय चौर्यं तस्यानुबन्धो यत्र तत्स्तेयानुबन्धि ३ । तथा सरक्षण मारणाद्युपायैस्तस्करादिभ्यो निजवित्तस्य गोपन तस्यानुबन्ध सातत्येन चिन्तन यत्र रौद्रध्याने तत्तथा । एव सति सरक्षणानुबन्धो रौद्रध्यानस्य चतुर्थो भेद, स च वस्त्रादौ ममहेतुत्वाद्वस्त्रादिक दुर्गतिहेतु, शस्त्रादिवत्, ततो न ग्राह्य, इति तव बुद्धिर्भवेत्तर्हि त्वदुक्तयुक्त्या रौद्रध्यान तदिद देवानाम्प्रिय ! देहादिष्वपि तुल्य, तेष्वपि जलज्वलनमलिम्लुचदशश्वापदादिविषकण्टकादिभ्य सरक्षणानुबन्धस्य तुल्यत्वात्, अतस्तेऽपि परित्याज्या प्राप्यन्ते । अथ देहादेर्मोक्षसाधनत्वाद्यतनया तत्सरक्षणानुबन्धविधान कथ न प्रशस्त ? तत कथं परित्याज्याः वस्त्रादयोऽपीति ? ततश्च—"मुच्छा परिग्गहो वुत्तो इति वुत्त महेसिणा" इत्यादिवचनात् यत्र वस्त्रकनकदेहादौ मूर्छा समुत्पद्यते तन्निश्चयत परमार्थतो

ग्रन्थ , यत्र तु सा नोपजायते तदग्रन्थ । आह—ननु यदि वस्त्र मुनक्ति तर्हि साधो कथमचेलपरिषहजिष्णुत्व, चेलेऽसत्येव तदुपपत्ते ? तदयुक्त, जीर्णादिभिरपि वस्त्रैरचेलकत्व लोकरूढमेव । यथेह काऽपि योषित् कटीवेष्टितजीर्णबहुच्छिद्रकशाटिका कश्चित्कौलिक वदति—"त्वरस्व भो शालविक ! शीघ्रो भूत्वा मदीयपोतीसाटिका निर्माय दत्स्व, नग्निका वर्तेऽहं" । तदिह सवस्त्रायामपि योषिति नाग्न्यवाचकशब्द प्रवर्तते "जससा कीरइ नग्गभावो मुण्डभावो अण्हाणयअदतवणय" इत्यादि न विरुध्यते । एव मुखवस्त्रिकारजोहरणादि चोपकरण सयमोपकारित्वेन योज्य ।

स्थानोपवेशनस्वापनिक्षेपग्रहणादिषु । जन्तुप्रमार्जनार्थं हि रजोहरणमिष्यते ॥ १ ॥

सपातिमादिसत्त्वाना रक्षार्थं मुखवस्त्रिका । भक्तपानस्थजन्तूना परी (प्रती) क्षार्थं च पात्रकम् ॥ २ ॥

पात्राभावे हि समक्तगोरसादयो हस्त एवानाभोगादिकारणाद्गृहीता , पश्चात् किं कर्तव्य ? तद्गत-सत्त्वाना प्राणनिष्पत्तिरेव स्यात् । पाणौ गृहीतरसाना परिगलने सति कुन्थुकीटिकादिप्राणघातन स्यात् । ग च नानाधोवनादिभि पश्चात्कर्मादयो दोषा आपतन्ति, अतो बालग्लानादीना पारिष्ठापनिकासमि-तिपालनार्थं पात्रग्रहण सयमार्हं । अपि च जघन्यतोऽपि किञ्चिन्न्यूननवमपूर्वपाठका उत्तमधृतिसह-नना "तवेण सुत्तेण सत्तेण" इत्यादिभावनया कृतपरिकर्माण एव जिनकल्प प्रतिपद्यन्ते, नान्यथा, इति न स्थापुरुषपाना जनाहंना जिनकल्पस्तीर्थकरैरनुज्ञात । तथा तीर्थंकरतुल्यता करोऽपि न तत्र योग्य, जिनास्तु पाणिप्रतिग्रहाधनन्तातिशयैर्युक्ता इत्याद्यनेकयुक्तिभि शिक्षितोऽपि स मिथ्याभिनिवे

ग्रस्मात्समुनीन्द्रवचनोत्थापको यत्नूत । शिवनूते' शिष्यौ द्वौ बुद्धिशालिनौ कौण्डिन्यकोटवीरायन्नता । तान्या परपराऽऽसीत् । क्रमेण "केवलिनो न भु ते, स्त्रियो मुक्तिं न यान्ति, त्रिविधाहारनियमोपवासे सचित्तजलपाने न दोष, देवद्रव्यस्य तु दिक्पटसाधूना ग्रहणे व्यापारणे च न दोष,' इत्यादिकतिपयवाक्यन्यूना एतातत्रचासि जैनागमव्यतिरिक्तानि रचयन्ति स्म, स्वेच्छया जल्पन्ति स्म, अत सर्वविसंवादिनो ज्ञेया बोटिकसतानवर्तिनोऽवसेया, बोटिकात्समुत्पन्ना दिक्पटा ॥

इत्यष्टमो दिक्पटसज्ञनिह्नव, प्रकाशितो हारितशुद्धबोधक ।
लब्धाऽपि बोधिर्व्रजतीति कस्यचि—त्तद्रक्षण भो कुरुत प्रयत्नत ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ षोडशस्तम्भे एकोनचत्वारिंशदधिकद्विशततम २३९ व्याख्यानम् ॥

## व्याख्यानं ॥ २४० ॥

अथ श्रुतनिन्दकानाह—

श्रीमद्वीरजिन नत्वा वक्ष्येऽह श्रुतनिन्दकान् । चरित्र वङ्कचूलीकाध्ययनाद्धारित यथा ॥ १ ॥

स्पष्टः । भावार्थस्तु दृष्टान्तेन ज्ञेयः—पञ्चमपट्टधरः श्रीयशोभद्रगुरुः, तद्विनेयो भद्रबाहुः श्रुतकेवली,

ततोऽग्निदत्तनामा मिथिलोद्याने प्रतिमा प्रतिपन्नस्तस्थौ स्म । इतो द्वात्रिंशतिगोष्ठिकनरा मद्यमांसमत्ता कामातुरया वेश्यया सह कुचेष्टां कुर्वन्त वने क्रीडन्ति स्म । मदान्धा एकदा तं साधुं वीक्ष्यानिशीथे मद्यमांसार्थं युगपद्धावन्ति । ते सर्वेऽन्धकूपे सहसा पतिता अन्योऽन्यशस्त्रापहृता मृत्युना गृहीता । साधुस्तान् पश्यन् दध्यौ—"हा हा ! अकृतसुकृता अकाले मृता" । इति ध्यात्वा कायोत्सर्गं पारयित्वा यशोभद्रगुरुसमीपे समागतः । तेन गुरो विनयोऽग्निदत्तो द्वात्रिंशतिगोष्ठिकनराणां सम्बन्धादिकं पप्रच्छ । तत्र सूरिराट् त्रिज्ञानोपयुक्तो दृष्टिवादान्नानिताग्रो यशोभद्रः श्रुतो वचनानुज्ञानन्तरं ततो निःक्रम्य आह—हे अग्निदत्त ! ते द्वात्रिंशतिनराः अत्र यथार्थं धावन्तोऽन्धकूपे पतितास्मात् गणिका कामलाता अन्तर्मुहूर्तमात्रतदध्यवसायेन मृता गणिकाकामवत्तादग्निपाटलनगरे सर्पः संभूतः तत्रैव कृमिर्जातो रक्षा, तेन मनोवेदनाऽतिमात्रजर्जरा । चिकित्सका औषधादिनि खेद गताः सन्ति । ततो वैद्यो कर्णोपाय शरीरं विदार्य ये द्वात्रिंशतिकृमयो दीन्द्रिया अस्थिमांसशोणितमिश्रितान् बहुलान् मुमोच । वैद्यस्तान् वेश्यायां अदर्शयत् । सा तु तन्मयरोहिण्या मज्जीकृत । वैद्यस्य सा वृत्तान्तं सर्वं । अत्र तेषु कृमिषु पूर्वकानुरागात् करुणां दधती सा दध्यौ—"इमे वराका दौर्भाग्यात् क्लिश्यन्ति, अतोऽहं पुरग्रामनगरभ्रमणं गत्वा मुञ्चामि" । ततस्ते नगरकोष्ठके क्षिप्ता । तत्र—"पुनरपि ते इमीय क्रीडन्ति, आर्तध्यानाद्धानिरूपा समाधा अंतमुहूर्त एव दुःखिनः" । ततः साधारणजन्मनो मुग्धाः पुनः शरणं प्राप्नुवन्ति, तत्र गन्तुमासा मूला पृथ्व्यादि

तत्रोन्नु यस्या धृष्टा परवश्या पूर्वजवमिथ्यात्वजावतो जिनमार्गप्रत्यनीका देवगुरुनिन्दकाश्च जाविन । यहूना नरनारीणा पुरत कथयिष्यन्ति—"अश्मधातुनिर्घटितप्रतिमापूजन व्यर्थ, हिंसानिदानत्वात्, इत्यादियुक्त्या चैत्यतीर्थागमोत्थापन विधास्यन्ति । अथ सा तपस्विनी अष्टसप्ततिवर्षाणि यावद्गृहवास परिपाल्य षड्विंशतिवर्षाणि यावत्परिव्राजकमार्गानुरक्ता सर्वायुश्चतुरुत्तरशतवर्षमित भुक्त्वा सप्तदिनानशनेन मृत्वा वानव्यन्तरस्य सुवत्सस्य दक्षिणेन्द्रस्य देशोनपल्याधायुष्का सुवत्सानाम्नी देवी जविष्यति । तत्र विजङ्गज्ञानेन पूर्वबहुजवसबन्धिनस्तान् द्वाविंशतिं वणिजो दृष्ट्वा सा देवी हृष्टा तुष्टा तेषा सर्वत्र साहाय्य विधास्यतीति । देवीप्रजावात्ते सर्वर्द्ध्या वृद्धिं प्राप्स्यन्ति । तदनु सर्वलोकाना पुरो पादमुद्धोषयिष्यन्ति—"जो ! पश्यतास्मत्कर्मफल प्रत्यक्ष, वय महासौख्यमनुजवाम, यूयमप्यस्मत्कर्मादर कुरुत, किं स्यादश्मबिम्बार्चया षट्कायोपमर्दिकया ?" । एव ते द्वाविंशतिभ्रष्टश्राद्धा अनेकजनान् कुमार्गे पातयिष्यन्ति । तत्समये स्वामिप्ररूपितश्रुतहीलन जविष्यति, श्रमणाना निर्ग्रन्थाना नोदयपूजासत्कारा जविष्यन्ति, अतिदुष्कर च धर्मपालन जविष्यति । ततस्ते द्वाविंशतिर्वणिज आयुरवसानसमये पोरुहरोगातङ्काजिजूता आर्तध्यानोपगता काल कृत्वा घर्माया प्रथमपृथिव्या॰ प्रथमप्रस्तटे दशसहस्रवर्षस्थितिकनारकित्व प्राप्स्यन्ति । तत परमनेकयोनिषु भ्रमिष्यन्ति । इति महादुर्लजवोधिन श्रीमज्जिनागमहेलिकाश्चेति । अथाग्निदत्त शिष्य पुनर्गुरु प्रणम्य व्यजिज्ञपत्—"स्वामिन् ! कस्मिन् काले एषा श्रुतनिन्दकानामुत्पत्तिर्जाविनी ?" । सूरि प्राह—तत्सूत्रगाथायामुक्त च—

जह्ना जणणहसूरी सुठेवठेगेण अग्गिदत्तमुणि ।
गुणसु महानाय जहा मुअदीखएमिह जहा वदउं ॥ १ ॥
मुञ्चाउं नीरपहूणो कुमरहियएगनरअहिएहिं ।
वरिमाउ मरनिरो जिणरकिसायारउं होही ॥ २ ॥
ततो अ मोक्खमएहि नवनवगुणएहि वरिसेहिं । ते कुणा वाणियगा अनमरुस्सवि सुयमिण ॥ ३ ॥
तम्मि समए अग्गिदत्ता मयसुररामिनगच्छत्ते । अरुतीसउमो कुचो वणिस्सउ धूमकेउगहो ॥ ४ ॥
तम्म तिउ तिन्नि मया तिसिमा एगरामिवरिमाए । तम्मिय सीउपठो सघरस सुयरस वदउं अस्थि ॥५॥
ज्य नस्सनहगुणा रमा सोचा मुणिसुरेरगो । पायाहिण कुणतो पुणो पुणो वदए पाए ॥ ६ ॥
आणुग्गिउण सूरि मगुग वह जहगहुमजूर । मखेहणापरमो गिठेउग्गिदत्तो पढमकप्पे ॥ ७ ॥
मिथ्यागुणस्थानकवासिनस्ते, मिथ्यान्तर्वत्यादि निवोपयन्त ।
ममागृहस्थरहस्यदन्त्य—स्तैनों तथा कार्यमिहागमझैः ॥ १ ॥
॥ इत्यब्दिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ षोडश-
स्तम्भे चत्वारिंशदधिकद्विशततम २४० व्याख्यानम् ॥
॥ समाप्तोऽयं षोडशः स्तम्भः ॥

पृ॰ गृहे प्रययौ। तेनापि सत्कृत्यागमनकारणं पृष्टः प्राह—"मम देवकुलकरणेच्छा वर्तते, परं प्रतिकृति काचिद्दर्शयता'। सोऽब्रवीत्—"पाटलीपुरे मत्कृतप्रासादस्त्वया दृष्टोऽस्ति न वा?"। सोऽवादीत्—"दृष्टोऽस्ति, परं प्रासादिकास्वरूप जनता स्वबुद्ध्या रचित प्रतिच्छन्द दृष्ट्वा वा"'। स जगौ—' अवन्तीनृपसुताया रत्नमञ्जर्याः प्रतिच्छन्देन सा कृता'। स प्राह—"सुदिन एष्यामि, त्व मद्धो नर। ततः सोऽवन्त्या ययौ। तत्र गोपुरमध्ये देवकुलेऽवसत्। अत्रान्तरे इमामुद्घोषणा श्रुतवान्— 'रात्रेश्चतुरो यामान् य इद मृतक रक्षेत् तस्मै दीनारसहस्र दद्म"। तन्मित्रानन्देनाङ्गीकृत, तदा लोकैरित्थं शिक्षित —"अत्र पुर उत्सूरे जाते गोपुरे स्थगिते कश्चिन्मृत्युमेति तच्चैवं रात्रौ मारी नश्यति, अतस्त्व समर्थोऽसि यदि तर्ह्यङ्गीकुरु"। स प्राह—"किमेतन्महत्कार्य वीराणा। ततस्तस्मा ईप्सितधनार्ध शव चार्पयित्वा "शेष प्रभाते दास्यामि" इत्युक्त्वेभ्यो गृहेऽगात्। अथ रात्रौ तेन भूताद्युपसर्गात्तच्छव रक्षित, प्रभाते च स्वजनैस्तद्भस्मसात्कृत, परं शेषधन याचितमपि न दत्ते। तदा सोऽवदत्–' राजसमक्ष धन गृह्णामि चेत्तदाऽहं वीराग्रणीर्भवेय."। ततश्चारत्नेप विधाय राजवेश्याया सदनं ययौ। तया सत्कार कृत। तेन चत्वारि दीनाराणा शतानि दत्तानि। हृष्टाऽक्का स्वपुत्रीं राजवेश्या प्राह–"अस्य महती सेवा कार्या"। ततो रात्रौ भोगसामग्रीं कृत्वा सुशय्याया गत स दध्यौ–"विपत्कामाना कार्याणि न सिध्यन्ति" इति विचिन्त्याब्रवीत्—"हे भद्रे! एक पट्टमानय, इष्टस्मरण करोमि"। तया झटिति हेममय पट्ट आनीत। तत्रोपविश्य पद्मासन निविड कृत्वा स्थित। स्त्रीकृता-

नेकक्कामचिह्नान्यपश्यन् समग्रा रात्रिमुल्लङ्घ्य प्रभातेऽन्यत्र ययौ । द्वितीयापि रात्रिस्तथैवातिक्रान्ता । ततोऽक्का प्राह—"नरु! राज्ञामपि दुर्लभा मम पुत्रीं किं निरूपयसि?" सोऽवदत्—"समये मर्म करिष्यामि, पर राज्ञो गृहे तव प्रवेशोऽस्ति न वा?"। सोवाच—"मम पुत्री राजचामरधारिणी, राज पुत्री रत्नमञ्जरी तु मत्सुतासखी वर्तते"। तच्छ्रुत्वा स राजवेश्या प्राह—"हे भद्रे! तर्हि तदग्रे त्वं कथय—यस्य गुणगणस्त्वया श्रुत हे सखि! जातानुरागया त्वया यस्य मुदा लेख प्रेषितस्तस्यामरस्य सुहृदागतोऽस्ति"। अथ सा तस्या अन्तिकं गत्वोवाच—"हे सखि! अद्याहं त्वत्प्रियोदन्तं निवेदितुमागताऽस्मि"। तत सेरास्या साऽऽह—"कोऽसौ मम प्रिय?"। सा ज्ञातगुणानखिलांस्तस्यावोचत्। श्रुत्वा राजपुत्र्येव दध्यौ—"नूनमपूर्व कोऽपि धूर्त, मम त्वद्यापि कोऽपि वल्लभो नास्ति, परमीदृशी येन कूटरचना कृता त पश्यामि"। तत साह—"हे सखि! अमुना गवाक्षेण सोऽद्यानेतव्यो मम प्रिय संदेशवाचको लेखयुत"। तत स्वगृह एत्य वेश्यया सर्व तस्योक्त। सोऽपि रात्रावक्कादर्शितमार्गेण सप्त प्राकारानुल्लङ्घ्य कन्यावासगृहे गत। अक्का च तद्वीर्य शशंस पुत्र्या अग्रे। अथ राजपुत्री तमाक्रोशन्त्य तस्य धैर्य निरीक्ष्य प्रियोदन्तकथनचातुर्य चावेत्य रूपलावण्यजल्पनकलाकुशल त दृष्ट्वा लज्जितेन तस्थौ। तदा स तद्धस्ताद्राजनामाङ्क कटकमुपाददे छुरिकया च वामजङ्घाया त्रिशूल कृत्वा निर्ययौ। तरुणाक्षिसा सा दध्यौ—"नून नैष सामान्यो नर, अतो मया न साधूकृत यदेष न सत्कारित"। इति चिन्तापरा निशात्यये निद्रामवाप। अथ प्रभाते मित्रानन्दो राजसमक्ष पूत्कार—"हे नृप! अखण्डित-

शासन यदि तत्पुत्र रक्षणो मम मार्गं परी न दत्ते, त्वं लोकपालोऽसि, दुष्टं निगृहाण"। ततो नृपेण स्वनरैः साकारितः। सोऽपि शालक्षतिकरलक्षे धन दत्त्वा नृपं प्रणम्य प्राह—"लोकाचारेण पितुर्विरहेण च स्वपदाने विलम्बोऽभूत्"। राजा सत्यं मत्वा विसर्जितः। ततो राजा मित्रानन्दं पप्रच्छ—"त्वया रात्रौ शव केनोपायेन रक्षितः?"। 'हे नृप! रात्रौ भूतप्रेतराक्षसशाकिनीव्यन्तरादयो नानारूपधरा आगमन्। मयाऽपि त्रियामान् यावत्तैः सह बहु युद्धं कृतं। सर्वे गुरुदत्तमन्त्रतो नष्टाः। तच्चतुर्थप्रहरे दिव्याभरणालङ्कृताङ्गी अप्सरःसमाना नानाभरणभूषिता मुक्तकेशा कराला स्वजनशाखा वमन्ती कर्णिकाकरा मम पार्श्वे काचिन्नार्याऽऽययौ, प्राह च—'हे दुष्ट! अद्य त्वां भक्षयामि' इति वादिनी तामालोक्य मया चिन्तितं—नूनं सेयं मारी। ततो मयाऽपि तया सह घोरं युद्धं कृतं। तस्याः करं मोटयित्वा कटकं गृहीतं, पुनः छुरिकया नश्यन्ती जङ्घोरौ खण्डिता"। तच्छ्रुत्वा विस्मितो राजा प्रोचे—"तत्कटकं दर्शय, यन्मारीहस्ताद्गृहीतम्"। तेनापि तद्दर्शितं। राजा स्वनामाङ्कं कटकं दृष्ट्वा दध्यौ—"किमहो मम कन्यैव मारी अभवत्? यतस्तस्या भूषणमिदं"। ततो देहचिन्तामिषेण नृपो गृहे गत्वा कन्यकां प्रसुप्तां छिन्नकटकां व्रणस्थाने कृतपट्टबन्धां वीक्ष्य वज्राहत इवाजनत्। "अहो! अनया मम कुले कलङ्को दत्तः"। नृपो नृपो मित्र मन्त्रिणं प्राह—"हे भद्र! मम सुता मारी, तस्मात् त्वं केनोपायेनास्या निग्रहं कुरु'। स प्राह—"हे नृप! युष्मत्कुले नैव जायेत्"। "हे मित्र! सत्यं मे सुता मारी, यावत्सर्वनगरं न मारयति तावत्केनाप्युपायेनास्या निग्रहः कार्यः"। स आह—

"अनेदे तावत्ता साध्याऽसाध्या वा ?" । नृपः प्राह—"स्वेच्छया गत्वा पश्य" । स कन्यापार्श्वे गतः, तयोपलक्षितः, आसनं दत्तं । तदनु स प्राह—"हे सुभ्रू मया तव कष्टं दृष्टं, अतोऽत्रागतोऽस्मि, पर चिन्ता मा कुरु, त्वां सौख्यस्थले नेष्यामि" । सा तद्गुणायत्ता प्राह—"इमे प्राणास्त्वदायत्ता । यतः —

अन्धो नरपतेश्चित्त व्याख्यान महिला जलम् । तत्रैतानि हि गच्छन्ति नीयन्ते यत्र शिल्पकैः ॥१॥"

इति श्रुत्वा मित्रस्ता जगाद—"नृपान्तिके मया सर्पकम्पे कृते त्वया फेत्कारा मोच्याः" । तयाङ्गी कृत । तत स नृप प्राह—"स्वामिन् ! सत्य रक्षकः, परमेक वाहनं सज्जीकुरु । रात्रौ मन्त्रबलेन ता मारीमारोप्य त्वद्देशान्त नयामि । अन्तरा यत्र सूर्य उदेष्यति तत्र सा मारी स्थास्यति" । ततो नृपेण राज्ञा तस्याग्रे वायुवेगा वडवा ढौकिता । सध्यायां केशेषु गृहीत्वा सा समर्पिता, तेनापि फेत्कारान्मुञ्चती ढक्किता । ता वडवारूढां पुरस्कृत्य स चचाल । राजा गोपुर पिधाय स्वगृहमागात् । सोऽपि मित्रपत्नीता मातुरिव तस्या नाकिं चकार । इतश्चामरदत्त पूर्णमासत्र्यानधिश्रितामरशोतसुको जातः । तत्समये काकतालीयन्यायेन ऋटित्येत्य तौ तस्य मिलितौ । तदैव तमेवाग्निं पौरांश्च साक्षीकृत्य पाणिग्रहण कृत । पौराः पुन स्त्रीस्वरूप मित्रधैर्य अमरजाग्य च प्रशशसु । अथ तस्मिन्नेव समये तत्पुराधीशेऽपुत्रे मृते प्रकृतिवर्गैः पञ्च दिव्यानि कृतानि । तेभ्यो राज्य प्राप्त, अमरदत्तो महामहेन राज्यस्वामी जातः । तेन मित्रो मन्त्रीकृत । रत्नसारो नगरश्रेष्ठी कृतः । इत्यमरसपरुशासनो राज्य पालया-

> यत्र वा तत्र वा यातु यथा तथा करोत्वसौ ।
> तथापि मुच्यते प्राणी न पूर्वकृतकर्मणः ॥ १ ॥"

अन्यदा रममाणानां गोपानामुन्नतिर्मोद्गुल्य तस्यापि मुनेऽनिशत्" । तन्निशम्य राजा मुहुर्व्यलपत् । राज्येवमाह—" हे दयित !

> यदाह नगराऽऽनीता तदाऽनेके निमन्त्रिताः ।
> उपायाः स्वविपत्तौ ते क गता हा महागते ॥ १ ॥"

अथ दमयन्ती गुरुः प्राह—

> शोकोऽवश्यं परित्याज्यो राजन् धर्मोद्यमं कुरु ।
> येनेदृशानां दुःखानां नाशो नोपजायते ॥ १ ॥

[illegible] "स्वामिन् ! मन्दिरवासी दुःख गतागतः ?" । सूरिः प्रोवाच—"हे नृप ! [illegible] [illegible] गर्भे जातः नगराद्राजा नाभिवत्ति" । पुनर्दम्पती प्रणामं पूर्वजन्म [illegible] । सूरि- [illegible] नो नगरासृति गते [illegible] । सोऽन्यदा स्वे [illegible] [illegible] महोपारगुप्तरगत" । इति [illegible] [illegible] निशापरीत [illegible] [illegible]

न स्यात् अन्यदा स्वामिनोक्त—"भो कर्मकर ! अद्यामुष्मिन् ग्रामे प्रयाहि"। सोऽवदत्—"अद्याहं न स्यात्" ... "धन्यावेतौ, याभ्यां भक्तितो मुनी प्रतिलाभितौ"।

न स्यात्      न्यदा स्वामिनोक्त—"भो कर्मकर ! अद्यामुष्मिन् ग्रामे प्रयाहि"। सोऽवदत्—"अद्याहं मुनि-यन्धूना मिलने व्याकुलोऽस्मि"। कुपितेन तेनोक्तं—"स्वजनमिलनं तव मा भवतु"। अत्रान्तरे मुनि-द्वन्द्वं तस्य गृहे समागतं। क्षेमंकरेण स्वभार्यायै प्रोक्तं महाहर्षेण—"प्रासुकमकृतकारितमन्नादिकं प्रति-लाभय"। तदा कर्मकरो दध्यौ—"धन्यावेतौ, याभ्यां भक्तितो मुनी प्रतिलाभितौ"। अत्रान्तरे तेषां त्रयाणामुपरि दृणिकाऽपतत्, तेन सममेव पञ्चत्वं गताः। स कर्मकरस्य जीवस्तव सखा मित्रानन्दोऽभूत्। स पान्थः शिम्बाग्राही विपद्य तद्वटे व्यन्तरो जज्ञे। एतं वीक्ष्य वैरं स्मृत्वा शवमुखेन जजल्प"। इत्यादि श्रुत्वा दम्पती जातिस्मरणं प्रापतुः। गुरूक्तं सत्यं मत्वा गृहं आजग्मतुः। क्रमेण प्रवृद्धे तत्पुत्रे राज्यं दत्त्वा दीक्षां जगृहतुः। क्रमेण मोक्षं प्रापतुः॥

क्रोधः स्वल्पोऽपि दुःखाय भवेत् पूर्वोक्तयुक्तिभिः।
ज्ञात्वाऽवश्यं परित्याज्यो निर्वाणसुखमिच्छुना॥ १॥

॥ इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ सप्तदशस्तम्भे
एकचत्वारिंशदधिकद्विशततमं २४१ व्याख्यानम्॥

## अथ द्विचत्वारिंशदधिकद्विशततमं व्याख्यान ॥ २४२ ॥

## ॥ अथ मानत्यागफलमाह ॥

मानत्यागान्महोन्नी तत्त्वज्ञानी सुदक्षताम् ।
दधन् दधौ महाज्ञान बाहुबली मुनीश्वर ॥ १ ॥

स्पष्ट । श्रीऋषभदेवसुत षष्टिवर्षसहस्रै षट्खण्डा पृथ्वीं साधयित्वा भरतोऽयोध्यायामाजगाम । तत्र द्वादशाब्दिके चक्रिराज्याभिषेके वर्तमाने स नृप आगतानागतान् जनानवलोकयन् तत्र निजानुजान-नागतान् विज्ञाय स्वभ्रातृन् प्रति प्रत्येक दूतान् प्रेषितवान् । ते गत्वा तानेवमाहु —"भो भरत-भ्रातरः ! यूय न त्वं नमथ'। ततस्तैरुक्त—"वयमपि नाभेयसूनव भरतोऽपि पितु सूनु' किमस्मत्त मत्र्योऽधिको योऽस्माक सेवा वाञ्छति । भो दूताः ! यूय स्वस्थाने यात, वय तात शृङ्गोचितं करि-ष्याम ।ततस्ते गुरुगिरौ जिनान्तिके गत्वाऽभ्यधु —"भो तात ! षट्खण्डेन राज्येनातृप्तो भरतो-ऽस्माक राज्य ग्रहीतु समीहते । भवदाज्ञया वय मर्त्येऽपि सज्जय तस्य राज्य गृह्णीमः" । स्वामिना तान्पुत्रान् प्रति धर्मदेशना दत्ता—

संबुज्झह किं न बुज्झह संबोहि खलु पेच्च दुल्लहा ।
नो हूवणमति राओ नो सुलह पुणरवि जीविय ॥ १ ॥"

मागत्य भरतान्तिकेऽनुजस्य सर्वस्वरूपं गदितवान् । "पाण्डुयशी शक्रेणापि जेतुं न शक्यते" इति
त्वा भरत सपादकोटिस्वपुत्रान्वित ससैन्यस्तक्षशिला प्रति चचाल । पाण्डुरप्यपि सम्मुखं समागात ।
सोमयशा नृपः स एकोऽपि खड्गत्रयहस्तिहयरथानां जेता । अस्य त्रिखण्डतनया । तेषु
कनिष्ठोऽप्येकोऽक्षौहिणीमिता सेना जेतु समर्थः । अक्षौहिणीमानं तु—२१८७० गजाः, २१८७० रथाः,
६५ १०९३५० पदातयः इति । अथ चक्रिसैन्ये चतुरशीतिलक्षाणि निस्वानाना समकाल
तदाण्डुन्डुजीना निर्घोषाः कोटिशतलक्षाणि तूर्याणि । तानि श्रुत्वा गोरमाद्या नटा भिया
। एकदा पाण्डुबलिनो नकोऽनिलवेगो विद्याधरश्चनिर्गेऽगतिभरतेरितोऽकानागन्त्या
गाहत, कन्दुकानिव गजानुत्क्षिप्य पुनर्भूमौ पततो मुष्ट्या जघान। चक्री तमनन्य वीक्ष्य
दीक्ष्य जीतो नष्टः मेरुकन्दरसागरादिषु यत्र यत्र याति तत्र तत्र चक्रं पूर्वार्जितकर्मा-
दा विद्यया वज्रपञ्जर निर्माय तत्र प्रविष्टः । तदा चक्रसुरा प्राहु—"रे रे रङ्क ! किं
नपास ?" । ततः षण्मासान्ते जातामर्षा बहिर्निःसृत , तावच्चक्र तच्छिरश्छित्त्वा चक्रिहस्तेऽनि-
ष्ठत् । एव युध्यमानयोर्द्वादशवर्षाणि व्यतीयुः । एकदा चक्रिज्येष्ठात्मजः सूर्ययशा पाण्डुनृपसैन्ये दावाग्नि-
रिव प्रससार, क्षणात् पितृव्यान्यर्णे आगतः । त वली प्राह—"वत्स ! त्व लघुरसि, यदेव मम सेना
विगाहसे तेनाह हृष्टोऽस्मि, त्वया पुत्रेणास्माकं यशः समुद्योतित , पर भ्रातृष्वपि न कश्चिन्मम यो
मम क्रोध सहते, तस्मान्मम दृष्टिं त्यक्त्वा दूरतो याहि" । स प्राह—"तात ! अद्य त्वया विना को

भगवद्देशनां श्रुत्वाऽष्टनवतिर्भरतानुजैर्व्रतं भेजे। तेषां राज्यानि भरतनृपो जग्राह। एकदा सेनापतिर्नरदेवं नत्वैवं व्यजिज्ञपत्—"स्वामिन्! बाहुबली भूपालस्त्वया न जितः तस्मिन्नजिते त्वया षट्खण्डं जितमप्यजितं, यतश्चक्रं शस्त्रागारे न प्रविशति"। इति श्रुत्वा वाग्मी दूतं तक्षशिलां प्रति प्रेषितः। स्तोकप्रयाणैर्गच्छन् बहुदेशे ग्रामे ग्रामे नगरे नगरे बहुजनमुखतो बाहुबलिनो यशः शृण्वन् तक्षशिलाया पुरिं समागतः। ततः प्रतिहारेण सुवेगो दूतो बाहुबलिन आज्ञया स्वर्णवर्णाभमन्तः सभं प्रवेशितः। तं नृपं नमस्कृत्य पुरः स्थितः। बाहुबलिना बान्धवनगरादिकुशलं पृष्टः, तदुत्तरं दत्त्वा प्राह—"भो नृप! तवाग्रजन्मा त्वन्मिलनोत्सुकस्त्वामाह्वयति। अतस्त्वमेकवारं तं नत्वा तस्याज्ञां शिरसि धृत्वाऽत्र समागच्छ। यतो बान्धवोऽपि भरताज्ञां न मन्यते तर्ह्यस्याकिञ्चित्करः पराक्रम इति लोकापवादविध्वंसाय, अन्यथा तव राज्यसंशयो भविष्यति। यतः—

> करालगरलः सर्पः पावकः पवनोद्धुरः।
> प्रभुः प्रौढप्रतापश्च विश्वास्या न त्रयोऽप्यमी॥ १॥

निर्जरा अपि यं पर्युपासते तस्य सेवया हीनत्वं नास्ति"। इति श्रुत्वा भूपो बभाषे—"हे दूत! तव भूपो मां वीक्ष्य लज्जिष्यति, यतो बाल्यावस्थायां जलकेल्यवसरे पादं धृत्वा नभसि कन्दुकवदुत्क्षिप्तस्तदपि विस्मृतं! भो दूत! षष्टिवर्षसहस्रेषु पापैर्भृतस्य तव भूपस्यान्यः कोऽपि प्रायश्चित्तदायको नास्ति, अहमेवास्मि। शीघ्रं समानय बलपरीक्षार्थं"। ततः सुवेगः सत्वरः प्रत्यावृत्तः स्तोकैरेव दिनैः

मूर्च्छिता इव ननृतुः । पुनरपि चक्री नृपश्च सिंहनादं तु सह चक्रतुः । तदा चक्रिणो ध्वनिः पूर्वोल्लङ्घ-यत् दुर्जनसौन्दमिव यथाक्रमं हीयमानोऽभूत् । तेन विलक्षं चक्रिणं नृपः स्माह—"हे भ्रातः ! मा खिद्यस्व, मया काकतालीयन्यायेन यदि जितं तर्हि किं जातम् ? इदानीं सज्जो भव मुष्टियुद्धाय" इति नृपे-णोक्ते द्वावपि प्रोच्चैर्नुनाराः स्फोटं कृत्वोरुतुल्यावन्योऽन्यमाश्लिष्य भुजाभ्यां पीडयन्तौ अगर्जतु । ततो नृपश्च-क्रिणं करेण गृहीत्वा लीलया कन्दुकवदुच्चैराकाशे उदलालयत् । क्षणाददृश्योऽभूत् । तेन सैन्यद्वयेऽपि हाहारवः प्रभूत् । नृपश्चिन्तया दध्यौ—"यावदार्योऽयं भूमौ पतित्वा न विशीर्यते तावदन्तरिक्षादेव गृह्णामि" इति विचिन्त्य तत्पाकारौ करौ कृत्वोर्ध्वदृष्टिस्तस्थौ । चिरेण स आययौ । बलिना बाहू प्रसार्य धृतः । तत्र क्रोधाध्मानश्चक्री तन्मूर्ध्नि मुष्टिघातेन तममूर्च्छयत् । नृपोऽपि चिरेण प्राप्तचैतन्यश्चक्रिणं हृदि मुष्टिघातं कृत्वा मूर्च्छां गमितवान् । क्षणाल्लब्धसंज्ञश्चक्री रोषारुणो दण्डेन नृपमूर्ध्न्यताडयत्, तेन मुकुट-शतखण्डं कृतम् । क्षणं नेत्रे निमील्य नृपो लोहमयदण्डेन चक्रिसन्नाहं शकलीचकार । ततश्चक्री दण्ड-घातेन नृपं जानुप्रमाणं भूमौ मग्नीचकार । ततो निर्गत्यायसदण्डेन नृपेण निहतश्चक्री आकण्ठं भूमौ मग्नः । कथञ्चिच्चैतन्यं प्राप्य निर्गतो दध्यौ—"नृपैश्चक्री न जीयते" इतीयं शाश्वती स्थितिरस्ति, अनेनाहं पराजितः, यद्यहं मयि चक्रित्वं न हि" इति ध्यायतस्तस्य पाणौ चक्ररत्नमुपागतम् । तदा चक्री नृपं स्माह—"अद्यापि तव किञ्चिन्न नष्टं, ममाज्ञां मन्यस्व, नो चेदनेन चक्रेण यमातिथिर्भविष्यसि" । नृपः स्माह—"गास्माकमरं कृत्वा किं रहसि ? प्राग्भूतमस्यापि बलं दर्शय" इत्यादि निर्भर्त्सितश्चक्री कोपाच्चक्र

ह्यामाभिलाषं पूरयति ?" इत्युक्त्वा धनुष्टङ्कारवं चकार। तदा सुराः सञ्जूय परस्परसुभटयुद्धं निषिध्य द्वयोर्बन्धवो शिक्षामिति प्राहु—"नो युगादीशपुत्रौ ! तातेनेदं विश्वं पालितं अधुना युवां किं सहर्तुं प्रवृत्तौ ? एतन्न युज्यते युवयोः । बलपरीक्षार्थमुत्ताभ्यामेवास्मदादिष्टैर्दृष्टि १ वाग् २ मुष्टि ३ बाहु ४ दण्डास्त्र ५ लक्षणैः पञ्चभिर्युद्धैर्योद्धव्यं"। इति सुरवाक्ये द्वाभ्यामपि प्रतिपन्ने सुरनराः साक्षीभूय तस्थुः । तदा चक्रिसैनिका दध्युः—"अनेन सह द्वन्द्वयुद्धे शक्रस्यापि जयप्राप्तौ सन्देहस्तर्हि अस्मत्स्वामी कथं जयं प्राप्स्यति ?" इति ध्यायतो भटान् वीक्ष्य चक्री स्वबलदर्शनार्थैकं महाकूपं कारयित्वा तस्योपकण्ठे स्थित्वा स्वस्य वामभुजं महालोहशृङ्खलाभिर्बद्ध्वा सर्वसैनिकान् प्राह—"यूयं सर्वेऽपि सञ्जूय शृङ्खलाकर्षणेन मां गर्तायां क्षिपत"। तैः सर्वैः कम्पितोऽपि मनाग् न चचाल। यतश्चक्रिणं भरतोत्पन्नसर्वनरनारीगजाश्वादयः सञ्जूयाकर्षणं कर्तुं तिलमात्रमपि न क्षमा तर्हि सेनाभिः किं भवेत् ?। ततश्चक्री हृदयखेपकरणमिषेण स्वहस्तमाचकर्ष, तेन ते सर्वेऽपि शृङ्खलालग्ना लतालग्नाः पक्षिण इव लम्बन्ते स्म। इति पराक्रमं वीक्ष्य हृष्टाः साक्षिण इव दूरे तस्थुः । ततश्चक्रिभूपौ प्राग्दृष्टियुद्धार्थं सम्मुखं स्थितौ अनिमेषदृक्षाऽवलोकयतां स्म । ताम्रलोचनौ भयकरावभूताम् । ततो बाहुबलिमुखं भीषणाक्षं विलोकयतश्चक्रिणो लोचने बाष्पाकुले वेगात्प्रमिलिते । तत्सैन्यं सर्वं न्यग्मुखं जातं । ततो लज्जितं चक्रिणं स प्राह—"भ्रातः ! किमुद्विग्नोऽसि ? कुरु वाग्युद्धं मया सह"। इति तेनोक्तश्चक्री महाघोरं सिंहनादं चकार, तेन जातं बधिरं स्कन्धावारमण्डलं । ततः सामर्षो बाहुबली सिंहनादं चकार तेन सैनिकाः सर्वेऽपि

मूर्छित इव स्थितः । पुनरपि चक्री नृपश्च सिंहनाद युद्ध चक्रतुः । तदा चक्रिणो ध्वनिः पूर्वोक्तप्रा-
य पूर्वमिव यथाक्रमं हीयमानोऽभवत् । तेन विलक्षं चक्रिणं नृप आह—"हे भ्रात ! मा
खिदः, मया सह राज्यकलहं यदि जितं तर्हि किं जातं ? इदानीं सज्जो भव मुष्टियुद्धाय" इति नृपे-
णोक्तेऽपि क्रोधेनास्फोटं कृत्वा बाहुयुद्धं परस्परमाक्षिप्य भुजाभ्यां पीडयन्तौ जगृहतुः । ततो नृपश्च
क्षिप्रं करेण गृहीत्वा लीलया कन्दुकवद्भ्रमयित्वाकाशे उदक्षिपत् । क्षणाददृश्योऽभवत् । तेन सैन्यद्वयेऽपि
हाहारवः प्रसृतः । नृपश्चिन्तयामास—"यावदयं भूमौ पतितो न विशीर्यते तावदन्तरिक्षात्पतन्
गृह्णामि" इति विचिन्त्य तथाकारी करौ कृत्वोर्ध्वदृष्टिस्तस्थौ । चिरेण स आययौ । पतितो बाहू प्रसार्य
धृतः । तत्र क्रोधाध्मातश्चक्री तन्मूर्ध्नि मुष्टिघातेन तमपूरयत् । नृपोऽपि चिरेण प्राप्तचैतन्यश्चक्रिणं हृदि
मुष्टिघातं कृत्वा मूर्छां गमितवान् । क्षणाल्लब्धसंज्ञश्चक्री रोषारुणो दण्डेन नृपमूर्ध्न्यताडयत्, तेन मुकुटः
चूर्णितः कृतः । क्षणं नेत्रे निमील्य नृपो लोहमयदण्डेन चक्रिणमाहृत्य जानुदघ्नं चकार । ततश्चक्री दण्ड-
घातेन नृपं जानुप्रमाणं भूमौ मग्नीचकार । ततो निर्गत्यायसदण्डेन नृपेण निहतश्चक्री आकण्ठं भूमौ
मग्नः । कथंचित्ततः प्राप्य निर्गतो दध्यौ—"चक्रीश्वरो न जीयते" इतीयं शाश्वती स्थितिरस्ति, अनेनाहं
सर्वनियुद्धैर्जितः तर्हि मयि चक्रित्वं न हि" इति ध्यायतस्तस्य पाणौ चक्ररत्नमुपागतम् । तदा चक्री नृप
माह—"अद्यापि तव किंचिन्न नष्टं, ममाज्ञां मन्यस्व, नो चेदनेन चक्रेण यमातिथिर्भविष्यसि" । नृप
आह—"बालस्यार्थं वृथा किं गर्जसि ? मामप्रतमस्यापि पशुं दर्शय" इत्यादि निर्भर्त्सितश्चक्री कोपाच्चक्र

ख्यानि मुक्त्वाऽदृष्टप्रेत्यसुखानि वाञ्छति स मूढ "। तत सोऽवक्—"अह मद्गुरु धर्माचार्यं चापृच्छयैष्या-
मि"। ते ऊचतु —"अथ त्वद्विरहव्यथासहनेऽक्षमे आवा, अत सत्य वच प्रयच्छ, येनाधारेण घटिका-
मुहूर्तादिकाल निर्गमयाव "। इति तच्चेष्टामिष्टा कृत्वा भ्रष्टचारित्रचेष्ट तदादिष्टवचन दत्त्वा गुरुपार्श्वे
समेत्येत्यूचे—"स्वामिन् पूज्य ! शिशुत्वावतो गृहीतदीक्षेण मयाऽद्यापि किञ्चित् पञ्चेन्द्रियसौख्य न दृष्ट,
इदानीं ममोजे नटकन्यके सुरसुन्दरीसमे सपृक्ते, तत्राह गच्छामि, ममाज्ञा ददातु, एतत्पतद्ग्रह रजोहरण
मुखपट्टीं च गृहाण" तत सूरिणा ध्यात—"अहो ! मायापिण्डाहारग्रहणफलमिद भवत्येव, यत उत्त-
रगुणहानितो मूलगुणा विनश्यन्ति, परमसौ नटपुत्रीपाशतो निर्गत्यात्रागतोऽस्ति तेन किञ्चिदाशारतो
ज्ञेय , पर भ्रष्टमयमचेतनयाऽसौ न वेत्ति यत्सावद्यवाग्निषिद्धा मुनय कथ सावद्यप्रवर्तनाज्ञा प्रदास्यन्ति ?
पर विलोकयामि अस्य स्थैर्यं किं सर्वथा व्रततो भ्रष्टमथवा किञ्चिदपि न्यून !" इति ध्यात्वा सूरिर्जे-
जल्प—"हे शिष्य ! इन्द्रादिसौख्य विहाय नटपुत्र्यङ्गसङ्गाशिष्वङ्गरतो भवसि त्व तथापि मद्यमांसाशन
त्वया न विधेय, एतद्द्वयो प्रत्याख्यान न त्याज्य एतदाहारिणामपि सङ्गो न कार्य इति मद्वाक्य प्रमाणी-
कुरु"। स विनयावनम्रो भूत्वाऽवक्—"स्वामिन् ! आजीवितव्यमिद धारयिष्येऽहं"। ततो गुरुणा
ध्यात—"एतावतैवास्य महान् गुणो भावी, पर सर्वथा श्रद्धाविमुक्तोऽय नास्ति, यत स्वल्पमात्रविरतिस-
द्भावान्मुनिगुणस्थानकात्कर्मवशात पतितस्याप्यस्योद्धारो भावीति"। ततः स चारित्र त्यक्त्वा चरित्रर-
सिको नटगृह आगत्योवाच तेभ्य —"यूय सर्वेऽपि मद्यमांसाशन सर्वथा त्यजथ चेत्तदाऽह स्थास्यामि,

नान्यथा" । ततो नटेन स्वपुत्र्यौ तस्मै दत्वा तत्कार्यं स्वीकृत । स तान्या सह सौख्यमन्वभवत् । अत्र नृपान्त्यर्थे ये ये नर्तका समायान्ति, तान् स्वकलया निर्जित्यानेकधनरत्नानाप्तुवान स्वगृहं पूर्णं । तस्य श्लाघा नटकुले सर्वत्र महती जाता। तत्र तस्य सौख्यमग्नानि द्वादश वर्षाणि व्यतीतु । अथान्यदा एको नृत्यकृद्वादेऽनेकान्मूल्यकारकान् जित्वा तत्ससार्थं चतुरशीतिस्वर्णपुत्तलकानि गृहे गत्वाऽनेकधा श्रुतपूर्वाषाढनायकवर्णनामसहमानो राजसभायामेत्य नृपमिति व्यजिज्ञपत्—" तत्र राजन्नदमाकारय, कला प्रदर्श्य जयामि"। नृपेण स आकारित । सोऽपि तत्रैत्य नटेन सह पणबन्धमित्यकरोत्—"योऽत्र न जयमावहति स स्वसर्वस्वं विहाय व्रजति" तद्वाक्यं जनसमक्षं स्वीकृत । अथाषाढः स्वगृह एत्य समस्तस्वजनान् प्राह—"अहं तन्नटजयार्थं गच्छामि" । तदा तत्प्रियजनान्या प्रोक्त—"कार्यसिद्धिं निष्पाद्य शीघ्र समागच्छ"। तत स सामग्रीयुतस्तत्रागात् । अत्र नटात्मजान्या ध्यात—"अहो ! बहवो वासरा व्यतीयुर्मद्यमासाद्य विना, तदद्य स्वैरं भुञ्ज्महे, भर्ता तु तेन सह वादचीन परमासान्ते समेष्यति" । ततस्ताभ्यां मद्यमाकण्ठ पीत, तेनोन्मत्ते बभूवतु । प्रथमं तेन नटेन कला दर्शिता, तत आषाढो हेलयाऽनेककलाजित्त जितवान् । तेन स निर्मदीभूय स्वधर्मी चतुरशीतिपुत्तलकानि च मुक्त्वा गतः । प्रणष्ट । तदा शीघ्र स स्वगृहे समेत, मदोन्मत्ते दुर्गन्धाढ्ये मक्षिकाव्याप्तास्ये ते उभे वीक्ष्य दध्यौ—"धिग्धिक्! अलीकगृहभूतायामनेकमक्षिकाचुम्बितास्यायामेतादृश्यामहमन्धीभूय द्विधाऽपि पतित" । इत्यादिवैराग्यपरो गुरुवचन सस्मृत्याट्टालिकाउत्तीर्य सर्वेश प्राह—"अनेकपापमन्दिर सुन्दरीचरित्र त्रिविध

[illegible] पुरे चतुर्दिग्विनिर्गतमुक्ताफल [illegible] नगरे सर्वर्द्धिसमृद्धनगरसमूहे चम्पाभिधानवरनगरमध्ये [illegible]

[illegible] चतुर्भिः प्रकारैर्बुद्धिनिधानः [illegible] तदनु [illegible] पुनरपि [illegible] ॥ १ ॥

[illegible] सुकृतकरणोद्यतः श्रेष्ठिनि मुमोच [illegible]

[illegible]

चरित्र, चिन्तितं च—"कथं विलोकयिष्यामि एतां क्व गच्छति ?"। ततो द्वितीयदिनसन्ध्यायां सर्वे स्वकार्यं कृत्वा तत्र शुषिरे काष्ठे प्रविश्य स्थित। रात्रौ काष्ठं पूर्ववच्चलितं गतं स्वर्णद्वीपे। अतस्तोऽपि वध्वो वने भ्रमन्ति। कर्मकरोऽपि काष्ठाद्बहिर्निर्गत्य सर्वत्र सुवर्णं पश्यन् विस्मितः स्वर्णमागमाकार कियत्सुवर्णं गृहीत्वा पूर्ववत् शुषिरे प्रविष्टः। आगतास्ता, मन्त्रबलेनोत्पाट्य दारु, स्वस्थानमागता। एवं कियति काले गते कर्मकृत्स्वर्णबलेन गृहकर्म समारम्भ करोति, श्रेष्ठिन समुन्नं पश्यति। श्रेष्ठिपुत्रेण चिन्तितं यदनेन किमपि लब्धं मद्गृहात्। एकदा रहसि जातिनं श्रेष्ठिना तथा यथा तेन सर्वोऽपि व्यतिकरो जवराजीर्णं प्रकाशितः। "अद्याहं यास्यामि, कदापि त्वया कस्यापि न वाच्यं" इति कर्मकरं प्रज्ञाप्य रात्रौ श्रेष्ठी काष्ठशुषिरे स्थितः। पूर्ववत् काष्ठं स्वर्णद्वीपं प्राप्तं। निर्गतः श्रेष्ठी। दृष्टा सर्वापि भूमिः स्वर्णमयी। लोभाकुलेन भृतं काष्ठशुषिरं, स्वयं गात्रं सङ्गोप्य (सङ्कुच्य) स्थितः, किञ्चित्सुवर्णमुत्सङ्गेऽग्रहीत्। तत वधूवय काष्ठोपरि तिष्ठति, वयं च वहति इति व्यवस्थया पश्चादागच्छन्तीनां तासां महाभारो जातः। यावता समुद्रमध्ये समायातास्तावच्छ्रान्ता कथयन्ति परस्परं—"एतत्काष्ठं स्वस्त्रया जलोपरि यत्काष्ठं तरति तद्गृह्यते"। एतच्छ्रुत्वा मध्यस्थः श्रेष्ठी ब्रूते—"हे वध्वो! अहं मध्येऽस्मि, न त्याज्यमेतत्"। ताभिरुक्तं—"चतुर्विंशतिकोटिस्वामिनस्तव किं न्यूनं यदत्र समेतोऽसि? त्वल्लाभ फलितं" इत्युक्त्वौषधैर्विना व्याधिर्गच्छतीति मत्वा, ससागरं तत्काष्ठं सागरान्तः प्रक्षिप्यान्यकाष्ठाधिरूढास्ता स्वावासे समेता। सागरान्तः पतितः सागरोऽपि द्विधा नीचैर्ययौ।

# पञ्चचत्वारिंशदधिकद्विशततम २४५ व्याख्यानम् ॥

अथ लोभविपाकमाह—

आरभ्यते पूरयितुं लोभगर्तो यथा यथा । तथा तथा महच्चित्रं मुहुरेष विवर्धते ॥ १ ॥

अनन्ता भोजनाच्छादनविषयद्रव्यसञ्चयाः । भुक्तास्तथापि लोभस्य नांशोऽपि परिपूर्यते ॥ २ ॥

स्पष्टौ । अत्रार्थे सुभूमचक्रिणो ज्ञातं—स्वर्गाद्वौ देवौ सुहृदौ विश्वानरधन्वन्तरिनामानौ एकः श्राद्धोऽपरश्च तापसभक्तः स्वस्वधर्मं वर्णयन्तौ धर्मपरीक्षार्थं मृत्युलोके आगतौ । तदा मिथिलेशपद्मरथो राज्यं त्यक्त्वा वासुपूज्यजिनान्तिके दीक्षां लात्वा मार्गे गच्छति, तं वीक्ष्यानेकमधुरसान्नादिना लोभितोऽपि क्षुधार्दितोऽपि न चचाल । ततोऽध्यन्येकस्मिन् कण्टकाकीर्णा द्वितीयस्मिन् भेकयश्च विकुर्विता । तृतीयमार्गाभावे ईर्यासमितिपरश्चरणयो रुधिरस्रावे उत्पन्नेऽपि कण्टकाकुलमार्गं न जहौ । ततो गीतनृत्यरम्यादिरूपैः क्षोभितोऽपि न स्खलितः । ततो नैमित्तिकस्वरूपाणि कृत्वाऽऽहतुः—"भो मुने ! वयं निमित्तज्ञानिनो यत्त्वदीयमायुर्महत्, अतो यौवनपक्षे भोगान् भुक्त्वा वार्धके तपः कुर्वीथाः" । ततो व्रती जगौ—"यद्यायुर्बहु तदा चिरकालं चारित्रं पालयिष्ये, भोगस्पृहा अनन्तशः कृता, अथ यावज्जीवं तस्य स्पृहा नास्ति" । ततस्तौ जिनशासनं प्रशशंसतुः । अथारण्ये जटी जीर्णतापसो जमदग्निनामा

१ मुपर्याय आस्यन्दोऽत्र पुस्ते

लोभश्चेदविपापकर्मजातको य(त)द्यस्ति किं पातकैः,
सत्यं चेत्तपसाऽपि किं शुचि मनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं निजैश्च महिमा यद्यस्ति किं मण्डनैः,
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥ १ ॥

स्पष्ट । नवरं विनयस्तु वन्दननमनादिर्बाह्यप्रकारोऽपि स्यात् । बहुमानश्चाभ्यन्तरप्रीतिबन्धः, तस्मिन् सति हि गुर्वादीनामेकान्तेन छन्दानुवृत्तिगुणग्रहणदोषाच्छादनाभ्युदयचिन्तनाद्येव कुर्यात्, श्रुतार्थिना गुर्वादिषु बहुमानं कार्यं, तं विना बहुनापि विनयेन गृहीता विद्या फलप्रदा न स्यात्, यत उक्तं च गौतमपृच्छायाम्—

विज्जा विन्नाण वा मिच्छा विणएण गिण्हिउं जो उ ।
अवमन्नइ आयरियं सा विज्जा निप्फला तस्स ॥ १ ॥

अत्र विनयबहुमानयोश्चतुर्भङ्गी यथा—कस्यचिद्विनयो न तु बहुमानं श्रीनेमिजिनं प्रति वासुदेव-

[illegible] १, [illegible] न तु [illegible], अथवा [illegible]माणनैमित्तिक[illegible] २, [illegible] ३, [illegible]कोऽपि [illegible]काकारिकादे[illegible] ४ । अत्र [illegible] यथा—

[illegible] निमित्तागमनीयानी, [illegible] बहुमानपूर्वं गुरोनिं[illegible] [illegible] द्वितीयस्तु [illegible] । अथवा तौ [illegible] । [illegible] तदेकोऽपि—"अये [illegible] [illegible] ।[illegible]—"[illegible], न तु [illegible], [illegible] [illegible] [illegible] [illegible]" । अपरोऽपि— [illegible] ' । [illegible]—"[illegible] ' । [illegible] [illegible] । [illegible] मदृशं [illegible]—"[illegible] राजः [illegible] । [illegible]—"[illegible] ' । [illegible] [illegible] [illegible] [illegible] [illegible]—"[illegible] ! । [illegible] [illegible] । [illegible] । [illegible]—"[illegible] ! [illegible] [illegible] ' । [illegible]

शेऽत' पाणदपत्रेषु ग्रन्थलेखनं"। इति श्रुत्वा लज्जितो नृपति "अहो! गुरूणा नवग्रन्थकरणशक्तिरस्खलिता, मम तु तल्लेखनेऽपि न सामर्थ्यं, तत्किं मम श्राद्धत्वं?' इति ध्यात्वाऽभ्युत्थाय "कृपणप्रस्याख्यान वारयत" इत्याह। "अद्य किमर्थमुपवास?" इति गुरुभि पृष्टे "इत' पर तदा भोक्ष्य यदा श्रीतालपत्राणि पूरितानि भवन्ति लेखकानां" इत्याह श्रीनृप। ततो "दूरे श्रीताला कथ शीघ्रमायान्ति?" इति गुरुभिरामन्तादिभि सबहुमान वार्यमाणोऽपि स्वय कृत उपवास।

अहो जिनागमे भक्तिरहो गुरुषु गौरवम्। श्रीकुमारमहीभर्तुरहो नि सीमसाहसम् ॥ १ ॥

इत्यादि श्रीसङ्घेन स्तूयमान स्वावासोपवनमागत्य खरतालान् चन्दनकर्पूरादिभिरभ्यर्च्य मन्त्रसिद्धइत्यमाह—

स्वात्मनीव मते जैने यदि मे सादर मन'। यूय भजत सर्वेऽपि श्रीतालद्रुमता तदा ॥ १ ॥

कथयित्वेति गाङ्गेयमय ग्रैवेयक नृप। कस्याप्येकस्य तालस्य स्कन्धदेशे न्यवीविशत् ॥ २ ॥

तस्थौ च सौधमागत्य धर्मध्यानपरो नृप। श्रीतालद्रुमता ताँश्च निन्ये शासनदेवता ॥ ३ ॥

प्रातरारामिका राज्ञे निवेदितवन्त। राजाऽपि तान् पारितोषिकदानेन समानन्द्य पत्राणि समानाय्य गुर्वग्रे मुक्त्वा वन्दित्वा श्रीहेमगुरुपादा।

किमेतदिति पृष्ट सन् गुरवे राड् व्यजिज्ञपत्। त वृत्तान्त चमत्कारकारण सर्वपर्षद ॥ १ ॥

हेमाचार्यस्तदाकर्ण्य कर्णयोरमृतोपमम्। नृपेण पारिपद्यैश्च सहाराम तमागमत् ॥ २ ॥

एतददृष्टश्रुतपूर्विणो ब्राह्मणा देवबोध्यादयोऽन्येऽपि लोकाश्च भरतामेषु श्रीताम्रता दृष्ट्वा विस्मयाश्चर्यमया बभूवुः । तदा च हेमाचार्यो जैनमतमुपश्लोकयितुमिदमाह—

> अस्त्येवातिशयो महान् भुवनविद्धर्मस्य धर्मान्तरा-
> द्यत्स्यात्र युगेऽपि ताम्रतरव श्रीताम्रतामागता ।
> श्रीजिनरूप्य न मौरज यदि भवेदन्यद्भुत पुष्पस्य,
> तद्यागेन तदा कथ सुरजिता दुर्गन्धय प्राप्नुयु ॥ १ ॥

इति श्रीजैनधर्मं स्तुत्वा नृप प्राह—"हे नृप ! अस्मिन् युगे यदि एतत्सदृशा न भवन्ति तर्हि श्रीमद्द्वादशागमश्रुतग्रन्थविस्तार कथ प्रवर्तते ? त्रिधा शुद्ध श्रुतभक्तिबहुमान सद्योऽपि फलप्राप्तिरूपत्व तव जात"। इति गुरूक्त वर्णन न्यग्मुखीभूय श्रुत्वाऽनेकप्रकारैर्ज्ञानज्ञानिना बहुमानमन्तर्भक्त्या विधाय परमार्हत एवमागमवर्जितशासनदेवताकृतमहिमाऽभ्युदयविशेषप्रथितप्रतापप्रभाववैभव स्वसौधमागत्य समहोत्सव पारणा कृतवान् ।

> उत्तमज्ञानैश्चरित्राद्यै श्रीमदर्हद्वचै । लिखितपुस्तकप्रस्थो ग्रन्थान् प्रयुक्तान् सुखम् ॥ १ ॥
> एव दानेषु ज्ञानेषु बहुमान दधत्पुमान् । महाश्रावकता लोकोत्तरामाप नृपोत्तम ॥ २ ॥

॥ इत्यब्ददिनपरिमितोपदेशप्रासादाख्यायामुपदेशप्रासादग्रन्थवृत्तावष्टादश-स्तम्भ एकोनषष्ट्यधिकद्विशततम २५९ व्याख्यानम् ॥

## षष्ठ्यधिकद्विशततम २६० व्याख्यानं ॥

अथोपधानवहनाख्य तुर्याचारमाह—

उपधानतपस्तप्त्वा आवश्यकं पठेद्गृही । योगैश्चागमान् साधुरित्याचारश्चतुर्थकः ॥ १ ॥

स्पष्ट' । नवरं श्रुतार्थिनामुपधानतपो विधाय पठन, उप समीपेऽधीयते येन तपसा तदुपधानमितिव्यु-त्पत्त्ये, तच्च साधूनामावश्यकादिश्रुताराधनार्थमागाढानागाढयोगरूपं सिद्धान्ताविरोधि स्वस्वसामाचार्य-नुसारेण ज्ञेयं, श्राद्धान'तु श्रीमहानिशीथाद्यागमोक्त पञ्चपरमेष्ठिनमस्कारादिसूत्राराधनार्थमुपधानषट्क प्रती-तमेव । साधूना योगोद्वहन विना यथा सिद्धान्तवाचनादि न शुध्यति तथोपधानतपो विना श्राद्धाना-मपि नमस्कारादिसूत्रपठनगुणनादि न शुध्यति । यदुक्त श्रीमहानिशीथे अकालाविनयाबहुमाना-नुपधानाद्यष्टविधज्ञानकुशीलाना मध्येऽनुपधानकुशीलस्य महादोषत्वं । अथोपधानवहन योगविधिं च ये न मन्यन्त तान् प्रति सूत्रवाक्यानि दर्शयन्ति पूर्वपूज्या उत्तराध्ययने एकादशेऽध्ययने—

वसे गुरुकुले निच्चं, जोगवं उवहाणवं । पियं करे पियं वाई, से सिक्खं लद्धुमरिहति ॥ १ ॥

तथा समवायाङ्गे द्वात्रिंशद्योगसङ्ग्रहमध्ये चतुर्थसङ्ग्रहे "अणिस्सिउवहाणे अ" । अत्र केचि-द्वदिष्यन्ति यद्योगा मनोवाक्कायसंबन्धिनस्तेऽत्र ज्ञेया । अत्रोत्तर—यदि योगशब्दस्य मूलार्थोपन्यासः क्रियते तर्हि वहनशब्दस्य कोऽर्थो भविष्यति ? द्वयो शब्दयो समानाधिकरणार्थकरणमेवार्हं । तथा स्थानाङ्गे तृतीयस्थाने—"तिहिं ठाणेहिं संपन्ने अणगारे अणाइअं अणवदग्गं दीहमद्धं चाउरंतसंसार कंतार

वीईसपज्ञा, त जहा—अखिदाणयाए दिढिमपन्नयाए जोगवाहिआए" इति। तथा १० स्थाने—"दसहिं ठाणेहिं जीवा आगमसिज्जद्दत्ताए कम्मं पकरेंति, त जहा—अणिदाणयाए दिढीसपन्नयाए जोगवाहि यत्ताए खंतिखमणयाए" इत्यादि ज्ञेय। यथा सर्वयोगवहनविधिरहस्यभीनद्यानुयोगद्वारे—"नाणं पचविह पन्नत्त, त जहा—आभिणिबोहियनाण जाव केवलनाण, तत्थ चत्तारि नाणाइ ठप्पाइ ठवणिज्जाइ, णो उद्दिस्सति णो समुद्दिस्संति णो अणुण्णविज्जति, सुअ नाणस्स उद्देसो १ समुद्देसो २ अणुन्ना ३ अणुओगो ४ पवत्तइ" इत्यादि। तथा योगविधिश्च जगत्यत्रमान्तेऽस्ति। तथा नन्दीसूत्रे श्रुतानामुद्देसमुद्देशनकाला प्रोक्ता सन्ति, यथाऽऽचाराङ्गे—"से ण अगट्ठयाए पढमे अग दो सुअक्खधा पणवीस अज्झयणा पणसीइ उद्देसणकाला" इत्यादि, अत्र कालशब्देन कालग्रहणविधिरेव च, यस्मादुत्तराध्ययन २६ चत्तारि कालग्रहणानि सन्ति, तानि योगविधानेयाह्यानि। अथ श्राद्धानामुपधानविधि विनैव साधूना योगविधि च परित्यज्य श्रुतज्ञान सदोपदिशन्ति सर्वेषा, तत्र योग्य तीर्थंकराशातना जायमानत्वात्। यथा श्राद्धाना सूत्रमाचाराङ्गादि तत्पठन सूत्रे निषिद्ध। तथाहि सप्तमाङ्गे—कामदेवश्राद्ध समवसरणे समागतस्तदा श्रीवीरस्त रात्युत्पन्नमुपसर्गस्वरूप सनासमक्ष स्माह, "तएण समणे भगवं महावीरे बहवे समणे निग्गथे अ निग्गथीओ अ आमतेत्ता एव वयासी—जइ ताव अज्जो सम णोवासगा गिहिणो गिहमज्झे वसता दिव्वमाणुसतिरिक्खजोणिए उवसग्गे सम्म सहति० सक्का पुणाइ अज्जो समणेहिं णिग्गथेहिं दुवालसगगणिपिडगं अहिज्जमाणेहिं दिव्वमाणुसतिरिक्खजोणिए उवसग्गे सम्म

हिंतए०"। अत्र सूत्रालापके साधव एव द्वादशाङ्गीधरा प्रोक्ताः, न तु श्राद्धा इति। तथा पञ्चमाङ्गे—"तत्थ ण तुंगियानयरीए बहवे समणोवासगा परिवसंति अड्ढा जाव अपरिभूया अभिगयजीवा० णिग्गंथे पावयणे णिस्संकिया० लद्धट्ठा गहियट्ठा० अवगुयदुवारा चियत्ततेउर परघरप्पवेसा०" इत्यादि श्राद्धवर्णन उपासकोपपातिस्थानाङ्गप्रमुखतो ज्ञेय, पर सर्वत्र लद्धट्ठा इति प्रोक्ता, न चैकस्मिन्नपि सूत्रे दृद्धसुत्ता इति उदिता, पर सर्वत्र निर्ग्रन्थप्रवचन सम्यगुक्त, न तु श्राद्धसूत्र। अपि च श्राद्धा सूत्रपठनमनोरथमपि न कुर्वन्ति, यत स्थानाङ्गे—"तिहिं ठाणेहिं समणेहिं समणे निग्गंथे महाणिज्जरे महापज्जवसाणे भवइ—कया ण अहं अप्प वा बहु वा सुअं अहिज्जिस्सामि? कया ण अहं एकल्लविहारपडिमं उवसंपज्जित्ताणं विहरिस्सामि? कया ण अहं अपच्छिममारणंतिअसंलेहणा०?। तिहिं ठाणेहिं समणोवासए महाणिज्जरे महापज्जवसाणे भवइ, त जहा—कया ण अहं अप्प वा बहु वा परिग्गहं परिचइस्सामि? कया ण अहं मुण्डे भवित्ता आगाराओ अणगारिअं पव्वइस्सामि? कया ण अहं अपच्छिममारणंतिअ संलेहणाझूसिए भत्तपाणपडियाइक्खिए पाओवगए कालमणवकंखमाणे विहरिस्सामि? एव समणसा सवयसा सकायसा पडिजागरमाणे समणोवासए महाणिज्जरे महापज्जवसाणे भवइ" इति। अथवा सूत्रकृताङ्गश्रुते नवमाध्ययने—

गिहे दीवमपासंता पुरिसादाणिया नरा। ते वीरा बंधणुम्मुक्का नावकंखंति जीविअं॥ १॥

गृहस्थावासे दीपो ज्ञानश्रुतज्ञान त प्रति अपश्यन्तो वीरपुरुषा असंयमजीवित न स्पृहयन्ति, अतः

श्रुतार्तिनः प्रथम स्त्रीतुर्न्तीति । अथवा योगवाहिसाधु जिना ये श्रुत पठन्ति तेषा तीर्थकरादत्त ग्गति । यत प्रश्नव्याकरण उक्त—"त सच्च नगव तित्थगरसुनासिय्र दसविह चउदसपुव्वीहि पाहुड- त्थवग्ग महरिसीण य समयप्पद्दिन्न देविंदनरिंदे जासीयत्थ" । अत्र पाठे मन्दमरिहन्तेन साधुभ्यो दत्त तुत गणदराणमनुष्याणा अर्पित समर्पित चेति । तथा श्रुतपठन यो गच्छति स माख्याकरणो- पलग्नानां ज्ञान करोति । यत प्रश्नव्याकरणे उक्त—"अह केरिस पुण सच्च तु जाणियव्व ज त दसविहि पच्चविह०" व्याकरणमध्य तत्र प्रोक्त—नाम १ आख्यात २ उपसर्ग ३ निपात ४ तद्धित ५ समास ६ सन्धि ७ पद ८ हेतु ९ यौगिक १० उणादि ११ क्रियाविधान १२ धातु १३ स्वर १४ विभक्ति १५ वर्ण १६ एवं सप्तान् वदान् यो जानाति स एव सत्यवाक्यको नान्य इति । यथा विगय ( विकृति ) विगलाम्नित्र अविठेमियगहूस तउ कप्पति नायउत्ताए विगीए अविगयपरिमिये विठेसियपाहुले" इति । अवयाउपाविनयम्याध्यायस्थानमध्ये साधुसाध्वीना श्रुतपठन निषिद्ध, तत्र न श्राद्धमहण । यत स्थानाङ्ग यथा "नो कप्पइ निग्गथाण वा निग्गथीण वा चउहि महापाडिवएहि सज्झाय करित्तए, त जहा— आसाढपाडिवए इन्दमहपाडिवए कत्तियपाडिवए सुगिम्हपाडिवए । नो कप्पइ निग्गथाण वा निग्गथीण वा चउहिं संझाहिं सज्झायं करित्तए त जहा—पढमाए पच्छिमाए मज्झण्हे अड्ढरत्ते' १० स्थानके दसविहे अन्तलिक्खए असज्झाए १० दसविहे ओरालिए असज्झाए' इत्यादि मर्म ज्ञात्वा श्रुतं साधूनामेवाम्या

महिलए० '। अत्र सूत्रालापके साधव एव द्वादशाङ्गीधरा प्रोक्ता, न तु श्राद्धा इति। तथा पञ्चमाङ्गे—"तत्थ ण तुंगियानयरीए बहवे समणोवासगा परिवसंति अड्ढा जाव अपरिभूआ अभिगयजीवा० लद्धट्ठा गहिअट्ठा० अवंगुयदुवारा चिअत्ततेउर परघरपवेसा०" इत्यादि श्राद्धवर्णनं उपासकाध्ययनाङ्गप्रमुखतो ज्ञेयं, परं सर्वत्र लद्धट्ठा इति प्रोक्ता, न चैकस्मिन्नपि सूत्रे उद्धगुणा इति उदिता, परं सर्वत्र निर्ग्रन्थप्रवचनं सम्यगुक्तं, न तु श्राद्धसत्कं। अपि च श्राद्धाः सूत्र-पठनमपि न कुर्वन्ति, यतः स्थानाङ्गे—"तिहिं ठाणेहिं समणे निग्गंथे महानिज्जरे महापज्जवसाणे भवइ—कया णं अहं अप्पं वा बहुं वा सुयं अहिज्जिस्सामि ? कया णं अहं एकल्लविहारपडिमं उवसंपज्जित्ताणं विहरिस्सामि ? कया णं अहं अपच्छिममारणंतिअसंलेहणा० ?। तिहिं ठाणेहिं समणोवासए महानिज्जरे महापज्जवसाणे भवइ, तं जहा—कया णं अहं अप्पं वा बहुं वा परिग्गहं परिचइस्सामि ? कया णं अहं मुंडे भवित्ता आगाराओ अणगारिअं पव्वइस्सामि ? कया णं अहं अपच्छिम-मारणंतिअ संलेहणाझूसिए भत्तपाणपडियाइक्खिए पाओवगए कालमणवकंखमाणे विहरिस्सामि ? एवं समणसा सवयसा सकायसा पडिजागरमाणे समणोवासए महानिज्जरे महापज्जवसाणे भवइ" इति। अपरं सूत्रकृताङ्गश्रुते नवमाध्ययने—

गिहे दीवमपासंता पुरिसादाणिया नरा। ते वीरा बंधणुम्मुक्का नावकंखंति जीवियं ॥ १ ॥

गृहस्थावासे दीपो भावश्रुतज्ञानं तं प्रति अपश्यन्तो वीरा असंयमजीवितं न स्पृहयन्ति, अतः

...जान । यत ...ाधुनन्तीति । अथवा यो...ाहगाधु विना ये श्रुत पठन्ति तेषा तीर्थंकरादत्त ...डश्च महनिमोल य समयण्दित देविदनरिंदे जासीयत्थ"। अत्र पाठ मरटमरिहन्तेन साधुन्यो दत्त श्रुत ...मनुष्याणा अग्रत समपित चति। तथा श्रुतपठन यो गच्छति स प्राव्याकरणो ...ज्ञान करोति। यत प्रश्नव्याकरण उक्त—"अट्ट करिस पुण गध तु जामियप ज त दर्यादि पञ्चांदि ...इत्र प्रोक्त—नाम १ आख्यात २ उपसर्ग ३ निपात ४ तद्धित ५ समास ६ ... ७ पद ८ हेतु ९ यौगिक १० उणादि ११ क्रियाविधान १२ धातु १३ स्वर १४ विभक्ति १५ वर्ण १६ ...मान ...यो जानाति स एव सत्यवाक्यवक्ता नान्य इति। यद्वा विगय (विकृति) ...श्रुतपठनव्याख्या। यत स्थानाङ्ग—"तओ अ वायणिज्जा पणत्ता, त जहा—अविणीए विगइपडिबद्धे अविओसियपाहुडे" इति। अत्रास्थानिकत्यस्वाध्यायकालमध्ये साधुसाध्वीना श्रुतपठन निषिद्ध, तत्र ७ आऽमहण। यत स्थानाङ्ग यथा नो कप्पइ निग्गथाण वा निग्गथीण वा चउहि महापडिवएहिं सज्झाय करित्तए, त जहा—आसाढपाडिवए इदमहापाडिवए कत्तियपाडिवए सुगिम्हपाडिवए। नो कप्पइ णिग्गथाण वा निग्गथीण वा चउहि सझाहि सज्झाय करित्तए त जहा—पढमाए पच्छिमाए मज्झण्हे अड्ढरत्ते' १० स्थानके दसविहे अतलिक्खिए असज्झाइए १० दसविहे ओरालिए असज्झाइए" इत्यादि सर्व ज्ञात्वा श्रुत ...

## एकषष्ट्यधिकद्विशततमं २६१ व्याख्यानम् ॥

अथ योगबहुमानमाह—

योगक्रिया विना साधु सूत्र पठेन्न पाठयेत् ।
दुष्कर्माणि विलीयन्ते श्रुत ( वाग् ) देवी वरदा सदा ॥ १ ॥

अत्रार्थे सबन्धश्चाय—पाटलिपुरे द्वौ बान्धवौ व्यवहारिणावभूताम् । अन्यदा गुरुसमीपे धर्मोपदेश शुश्रुवतु , यथा—"धम्मो मंगलमुक्किट्ठ अहिंसा संजमो तवो । देवा वि त नमसंति जस्स धम्मे सया मणो ॥ १ ॥" इत्यादिदेशना श्रुत्वा चारित्रमङ्गीचक्रतु । तत्रैको भ्राता क्षयोपशमवशाद्बहुश्रुतो जात , गुरुभिर्योग्यो विज्ञाय सूरिपदे स्थापित । स पञ्चशतीयतिपतिः सर्वेषा वाचना ददाति । शयने सति पुन पुनस्ते प्रश्न कुर्वन्ति, रात्रावपि प्रमिलावकाश न लभते, ततो ज्ञानावरणीयकर्मोदयादेव चिन्तयति—"धिङ्मा शास्त्रपारग, यतोऽह क्षणमपि रतिं न प्राप्नोमि, धन्यो मे भ्राता निश्चिन्तस्तिष्ठति, यत —"मूर्खत्व हि सखे ममापि रुचित तस्मिन् यदष्टौ गुणा, निश्चिन्तो १ बहुभोजनो २ ऽत्रपमना ३ नक्तंदिवा शायक ४ । कार्याकार्यविचारणान्धबधिरो ५ मानापमाने समः ६, प्रायेणामयवर्जितो ७ दृढवपु ८ मूर्खः सुख जीवति ॥ १ ॥" इत्यादि, "अतोऽह क्लेश जहामि" इति ध्यायन्नास्ते । अन्यदा मुनयो विहारभूमिमाहारग्रहणादिकार्येषु गताः, ततः सूरिश्चिन्तयति—"अहो ! यद्गुणिर्वा-

गर्भेमयाऽत्रराशो लब्ध , इतो निर्गत्य स्वेप्सित साधयामि" इति विचिन्त्य सूरिर्मतितो बहिर्गत , एकाकी नगरान्निर्गच्छन् कौमुदीमहोत्सवे एकं स्तम्भ ददर्श, कथम्भूत ? जनैर्गीयमान नानाविधवस्त्रैर्भूषित । महोत्सवे समाप्ते पुनस्त स्तम्भ निगतशोभ काकादिभिनिषेवित ददर्श । तत सूरिरचिन्तयत्—"अमी स्तम्भो यदा जनै पूजित परिवृतश्चासीत्तदाऽत्यन्त शोभागृहमासीत्, इदानीं तु कामपि शोभा न भजते । ननु परिच्छदसमन्वितस्यैव शोभा भवेत्, नान्यथा, तद्दि धिग्मा, परिकरतो जिनधर्मतश्च परिभ्रष्ट स्वैर विहर्तुमिच्छामि" । इत्यादि विचिन्त्य पुन स्वयसतो समागत स्वमनसैवालोचना जग्राह, पर दुश्चिन्तितेन ज्ञानावरणीयकर्म बद्ध, तदनालोचितमेव बभूव । पुनर्निर्मल चारित्र प्रपाल्य स्वायु पर्यन्तेऽनशनेन मृत्वा स्वर्गे गत । ततश्च्युत्वाऽऽभीरसुतो जात , क्रमाद्यौवने पित्रा कन्या परिणायित , क्रमात्तस्या सुता जाता, साऽत्यन्तरूपलावण्या बभूव । अन्यदाऽनेक आभीरा घृतभाजनै शकटानि भृत्वा विक्रेतु ग्रामान्तर प्रतस्थिरे, तदा सोऽप्याभीरः शकट भृत्वा स्वपुत्रिका खेटकत्वेन सस्थाप्य तैः सार्धं चलित । इतश्चान्ये शाकटिकाः कन्या वीक्ष्य व्यामोहिता व्यग्रमानसा उन्मार्गे शकटानि वाहयामासु , ततो भग्नान्यनांसि । तत्स्वरूप ज्ञात्वा तज्जनकश्चिन्तयामास—"धिक् ससारस्वरूपं, जीवा असारे मलमूत्रपुरीषपात्रे स्त्रीशरीरे स्वहितसाधननिरपेक्षा कामिनो मुह्यन्ति" इत्यशुच्यादिभावनयोत्पन्नवैराग्यो जात । ततो घृतादि विक्रीय निजग्रामे समागत्य स्वां दुहितरमुद्वाह्य सद्गुरुपादमूले दीक्षामुपाददे । क्रमेणावश्यकादियोगोद्वहन विधायोत्तराध्ययनयोग वहता तेनाध्ययनत्रय पठित पूर्वोपार्जितकर्मोदये-

जहा—बहुरया १ जीवपएसिआ २ अवत्ता ३ सामुच्छेआ ४ दोकिरिया ५ तेरासिआ ६ अबद्धिया ७। एएसि णं सत्त ह पवयणनिण्हगाणं सत्त धम्मायरिया होत्था, तं जहा—जमाली १ तीसगुत्ते २ आसाढे ३ आसमित्ते ४ गंगए ५ छलूए ६ गोट्ठामाहिल्ले ७ इत्यादिना अमी सप्त निह्नवाः सूत्रे सूत्रमात्रेण सूचिता। तन्मध्ये तृतीयनिह्नवस्तु योगक्रियावहनानन्तरं मिथ्यात्वोदयेनोत्पन्नः, अथमनेकस्थानेषु साधुप्रधानं तपो वर्णितं दृश्यते, अहो! तदपलापं यः करोति तस्य धार्ष्ट्यमनाख्यनीयं, यदसत्यः सूत्रविरुद्धः जायते, तदा स्वपरकष्टसाधुचरित्रं व्यर्थतां प्राप्नोति सूत्रे सूचितमपि, तद्यथा श्लोकोपलक्षितं संप्रदायागत—श्वेताम्बिकानाम्न्यां पुर्यां पोलासखण्डके वने सगच्छा आर्याषाढसूरयः समवासार्षुः। तेषामागमपाठिनो बहवः शिष्या आगाढयोगवहनं प्रतिपन्नाः क्रियारताश्च बभूवुः। तथाविधकर्मोदयात्सूरयस्तत्रैव दिने हृदयशूलेन कालं कृत्वा सौधर्मदेवलोके नलिनीगुल्मविमाने देवत्वेनोत्पन्नाः। न च निशाता यत्रापि गच्छमध्ये। ततोऽवधिज्ञानोपयोगात्तान् संयतानागाढयोगं प्रपन्नान् विज्ञाय साध्वनुकम्पया समागत्य तदेव शरीरमधिष्ठायोत्थाप्य प्रोक्तवान् साधवः—"वैरात्रिककालं गृह्णीत"। उत्तराध्ययने २६ तत्र कालग्रहणं योगविधियोग्यानुष्ठानं—

पोरसीए चउब्भाए वंदित्ताण तओ गुरुं। पडिक्कमित्ता कालस्स कालं तु पडिलेहए ॥ १ ॥

अत्र प्राभातिककालग्रहणं स्थापितं।

तम्मेव य नक्खत्ते गयणचउब्भागसावसेसम्मि। वेरत्तियं पि कालं पडिलेहित्ता मुणी कुज्जा ॥ २ ॥

नारं नापि असह्योयाध्ययनस्याक्षरमात्रमपि नायाति । ततो गुरून् पप्रच्छ—"एतन्नायाति" । गुरुणा-ऽपि—"हे मुने ! त्वमाचाम्लं तपः कुर्वन् मा रुष मा तुष इति रागद्वेषनिग्रहगर्भं पदं समुद्घोषय"। तेनोक्त—"अन्यपाठे सूत"। तं चाढं घोषयति तदपि मुखे नायाति, अस्पष्टवर्णोच्चारणेन लोका हसन्ति स्म, स क्षमां बिभर्ति, प्रत्युत स्वकर्मैव निन्दति—"अरे जीव ! मा रुष मा तुषेति" सर्वसिद्धा-न्तसारं तदेव पठतो लोकैर्मासतुसनाम दत्तं । आत्मनिन्दां विदधानस्याचाम्लं कुर्वतो द्वादश वर्षाणि व्यतीतानि, ततस्तत्पदं घोषयन् शुक्लध्यानेन क्षपकश्रेण्यारूढः सकललोकालोकप्रकाशकमचलं केवलज्ञा-नमवाप । ततो देवैः केवलमहिमा चक्रे । ततो महीं विहृत्य भूरिशो भव्यान् प्रतिबोध्य मासतुसकेवली अनन्तचतुष्कमयं शाश्वतं स्थानमवाप ॥

इत्थं माषतुषः साधुर्भावनाक्षिप्तपातकः । केवलज्ञानमासाद्य प्रपेदे शाश्वतं पदम् ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तावष्टाद-शस्तम्भे एकषष्ट्यधिकद्विशततमं २६१ व्याख्यानम् ॥

## द्विषष्ट्यधिकद्विशततमं २६२ व्याख्यानम् ॥

अथ योगोद्वहनस्थिरीकरणार्थं दृष्टान्तमाह—

नलिनीगुल्मतः प्रत्याचार्यजीवः सुरोत्तमः । योगवाहिस्वशिष्याणां क्रियास्वविघ्नमातनोत् ॥ १ ॥

स्पष्टं । नवरं स्थानाङ्गसूत्रे—समणस्स भगवओ महावीरस्स तित्थंसि सत्त पवयणनिन्हगा पन्नत्ता, तं

जहा—बहुरया १ जीवपएसिया २ अवत्ता ३ सामुच्छेइया ४ दोकिरिया ५ तेरासिया ६ अबद्धिया ७। एएसि णं सत्तन्हं पवयणनिण्हगाणं सत्त धम्मायरिया होत्था, तं जहा—जमाली १ तीसगुत्ते २ आसाढे ३ आसमित्ते ४ गंगए ५ छलूए ६ गोट्ठामाहिल्ले ७ इत्यादिना अमी सप्त निह्नवा सूत्रे सूत्रमात्रेण सूचिता । तन्मध्ये तृतीयनिह्नवस्तु योगक्रियावहनानन्तरं मिथ्यात्वोदयेनोत्पन्न, अथमनेकस्थानेषु साधुप्रधानं तपो वर्णितं दृश्यते, अहो ! तदपलपनं यः करोति तस्य धार्ष्ट्यमनात्मज्ञीयं, यत्प्रत्यक्ष सूत्र विरुद्धं जायते, तदा स्वस्वच्छन्दादिचरित्र व्यर्थता प्राप्नोति सूत्रे सूचितमपि, तच्चेदं श्लोकोपज्ञातं संप्रदायागत—श्वेताम्बिकानाम्न्या पुर्यां पोलासाख्ये वने भगवान् आर्याषाढसूरय समवासार्षुः । तेषामागमपाठिनो बहवः शिष्या आगाढयोगवहनं प्रतिपन्ना क्रियारताश्च बभूवुः । तथाविधकर्मोदयात्सूरयस्तेन दिने हृदयशूलेन कालं कृत्वा सौधर्मदेवलोके नलिनीगुल्मविमाने देवत्वेनोत्पन्ना । न च विज्ञाताः केनापि गच्छमध्ये । ततोऽवधिज्ञानोपयोगात्तान् अयतानागाढयोग प्रपन्नान् विज्ञाय साध्वनुकम्पया समागत्य तदेव शरीरमधिष्ठायोत्थाप्य प्रोक्तवान् साधवः—"वैरात्रिक कालं गृह्णीत"। उत्तराध्ययने २६ उप कालग्रहण योगविधियोग्यानुष्ठान—

पोरसीए चउब्भाए वंदित्ताण तओ गुरुं । पडिक्कमित्ता कालस्स कालं तु पडिलेहए ॥ १ ॥

अत्र प्राभातिककालग्रहणं स्थापितं ।

तम्मेव य नक्खत्ते गयणे चउब्भागसावसेसम्मि । वेरत्तियं पि कालं पडिलेहित्ता मुणी कुज्जा ॥ २ ॥

त्रिककालग्रहणं निगदित । इत्यादिसूत्रानुसारेण तद्देववचसा साधुभि कृत, तथैव श्रुतस्योद्देशसमु.शानुज्ञास्तदग्रव कृता । एव दिव्यप्रभावतस्तेन देवेन तेषा साधूना कालजङ्गादिविघ्न रक्षता शीघ्रमेव निस्तारिता योगा । ततस्तेन तच्छरीर मुक्त्वा दिव गच्छता प्रोक्ताः साधव यथा—"क्षमणीय भदन्तं यदसयतेन सता मयाऽऽत्मनो वन्दनादि कारिताश्चारित्रिणो यूय, अह ह्यमुकदिने काल कृत्वा दिव गत, युष्मदनुकम्पयात्रागत, निस्तारिताश्च भवता योगा" इत्याद्युक्त्वा क्षमयित्वा स्वस्थान गत । ततस्ते साधवस्तद्वपु परिष्ठाप्य चिन्तयन्ति—"अहो! अविरतो बहुकाल वन्दित, तदित्थमन्यत्रापि शङ्का को जानाति ? कोऽपि सयत कोऽप्यसयतो देव इति, ततोऽवन्दनमेव श्रेयः, अन्यथा ह्यसयतवन्दन मृषावादश्च स्यात्" । इत्य तथाविधगुरुकर्मोदयात्ते मिथ्यापरिणतमतय साधवोऽव्यक्तवाद प्रतिपन्ना परस्पर न वन्दन्ते । तत स्थविरैस्तेऽभिहिता —"यदि परस्मिन् सर्वत्र भवता सदेहस्तर्हि येनोक्त देवोऽहमिति तत्रापि भवता कथ न सदेह ? किं स देवो वाऽदेवो वेति । अथ तेन स्वयमेव कथितमह देव ( इति ) तथा देवरूप प्रत्यक्षत एव दृष्ट, न तत्र सदेह, हन्त यद्येव तर्हि य एत कथयन्ति वय साधव ( इति ) तथा साधुरूप प्रत्यक्षत एव दृश्यते, तेषु क साधुत्वसदेहः ? येन परस्पर यूयं न वन्दध्वे ? । न च साधुवाक्याद्देववचन सत्यमिति शक्यते वक्तु, देववाक्य क्रीडाद्यर्थमन्यथाऽपि संभाव्यते, न तु साधुवचन, तद्विरतत्वात्तेषामिति । किंच यदि प्रत्यक्षेष्वपि यतिषु भवता शङ्का तर्हि परोक्षेषु जीवादिषु सुतरामसौ प्राप्नोति, तथा च यतिरूपे प्राणिनि साधुत्व भवेन्न वेति सदिग्धमेव, प्रति-

माया तु निरवद्य नास्ति निश्चयत, ततः किमिति सा वन्द्या? साधुरूपे च किमिति वन्दनप्रतिषेधः ?"। तदा स वादी स्याद्—अथ यतदेवाधिष्ठितयतिरूपे वन्द्यमाने तद्गतासंयमस्यापापानुमतिः स्यात्, न त्वेवं प्रतिमायाः। अत्रोच्यते—ननु देवताधिष्ठितप्रतिमायामप्यनुमतिलक्षणो दोषो नरेन्द्रेति। पर स्याद्—नाय प्रतिमाया दोष निश्चुभाध्यवसायस्य जिनमुद्रां नमस्यतः। यद्येवं ततो यतिमुद्रां यतिरूप-विशुद्धाध्यवसायस्य नमस्यत को दोष? येन भवन्तः परस्परं न वन्दन्ते?। अत्राह पर—यद्येवं लिङ्गमात्रधारिणं पार्श्वस्थादिकमपि यतिमुद्रां विशुद्धाध्यवसायस्य नमस्यतो न दोष। तदयुक्तं, पार्श्व-स्थादीनां सम्यग्निर्णयरूपस्याभावात्, तदभावश्च आहारेण विहारेणेत्यादिनिर्णयलिङ्गस्यानुपलम्भात्। तत प्रत्यक्ष दोषवत पार्श्वस्थादीन् वन्दमानस्य सावद्यानुज्ञालक्षणो दोष एव, उक्तं च—

जइ चरणगुणिग जाणतस्स नमओ हवइ दोसो। निद्धंधसऽपि नाऊण वंदमाणे धुव दोसो ॥ १ ॥

इति। अथ प्रतिमामपि न वन्दध्वे यूय हन्त यद्येवं शङ्काधारिणो भवन्तस्तर्हि मा देवहृता भवेयु-रित्याहारोपधिशय्यादयोऽपि न ग्राह्या इति। विचेत्थमतिशङ्काकुलताया समस्तव्यवहारोच्छेदप्रसङ्ग, यतो निश्चयकारिज्ञानं विना को जानाति? किमिद भक्तं कृमयो वा? चीवरादौ माणिक्य वा सर्पो वा? इत्यादौ सर्वत्र भ्रान्त्यनिवृत्ते सर्वमभोग्यत्वं प्राप्तमिति। यथा वाऽऽर्याषाढदेवो यतिरूपधरोऽत्र दृष्ट-स्तथाऽन्ये कियन्तः सुरा भवद्भिर्दृष्टपूर्वा? यदेतावन्मात्रेणापि सर्वत्र भवतामप्रत्ययः? न हि कदाचि-त्क्वचित्कथंचिदाश्चर्यरूपे कस्मिंश्चिदर्थविधे दृष्टे सर्वत्र तथाभावाशङ्का युज्यते। तस्माद्व्यवहारनयमा-

...वसम्ब्रमस्याना सवा प्रवृत्तिव्यवहारत स्यात्, तदुच्छेद
यते । सर्वज्ञा अपि व्यवहारमार्गं नोच्छेदयन्ति । यदुक्तं महाभाष्ये श्रीजिन-

च्छी जमसुद्ध पि गहियं सुयविहीए । कोवेइ न सवण्णू वदइ य कयाइ छउमत्थ ॥ १ ॥

नाप्रमाणीकरोति सर्वज्ञ , न परिहरति शुद्ध इत्यर्थ । इत्यादियुक्तिभि प्रज्ञापिता अपि
मु । तत कायोत्सर्गपूर्व स्थविरैस्ते वहिष्कृता । पर्यटन्तोऽन्यदा राजगृहाभिध पुर
मौर्यवशसम्भूतो बलभद्रो नाम राजा । स च श्राद्ध । ततस्तेन ते विज्ञाता यथाऽव्यक्त-
ह्या इह समायाता गुणशिलचैत्ये तिष्ठन्ति । स श्राद्धस्तान् प्रतिबोधयितु निजैर्भटैर्वक्त्राऽऽना
यत् । ततो नृमान् सेवकानित्यादिशत्—"कटमर्देन सर्वानप्यमून्मर्दयत" इति कृत्रिमा रुप दर्शयन्
साद । कटाध स्था जना द्विपैर्मर्द्यन्त इति द्विपान् कटांश्च राजपुरुषा आनिन्यिरे । तान् वीक्ष्य मुनयो
जीता इति नृपतिमूचिरे—"हे महीपते ! श्राद्धोऽपि त्व कथमस्मान् साधून् हसि ?"। नृपेणोक्त—
"यूय तस्करा हेरिका वा को वो वेत्ति ?" इति नृपेण प्रोक्ते ते प्रोचिरे—"राजन् ! नून वय साधवो
नान्ये"। नृपोऽवादीत्—"भवन्मते सर्वमपि वस्त्वव्यक्त, तस्मात्को युष्मान् सत्यान् साधून् वेत्ति ?
कथ च युष्माभि कथ्यते युष्मन्मतेऽहमपि श्राद्धोऽन्यो वाऽस्मि ? तत्कथं यूय मा श्रावक ब्रूथ ? स्वस-
वहानिप्रसङ्गात् अव्यक्तवादेन परस्परमवन्दमानाना युष्माक । अथ चेत्प्रतिपद्यते व्यवहारनयस्तदा

निर्ग्रन्थश्रमणान् युष्मानहमुत्तमान् श्रद्दधामि" । ततस्ते लज्जिता बाढं सत्वरं मनुजो गिरा "श्रीमज्जिनोक्तज्ञानक्रियासमन्विता वयं परस्परं यथाज्येष्ठं वन्दमाना श्रमणाः स्म" एवं पुनः पुनरूचुः, "हे साधुराज ! त्वया वयं चिरं भ्रान्ता सन्मार्गं प्रापिता" । ततो जिनयानमस्रो नृपोऽवादीत्—"युष्मान् प्रतिबोधयितुं मयाऽयुक्तं निदधे, तत्सर्वं क्षन्तव्यं" ।

इत्युदीर्य बहुमानपूर्वकं, तेन नृपतिवरेण वन्दिताः ।
साधवः पुनरवाप्तबोधयः, पूर्ववज्जगति ते विजह्रिरे ॥ १ ॥
चतुर्दशोत्तरे वीरमोक्षाद्वर्षशतद्वये ।
जातस्यास्य तृतीयस्य निह्नवस्योदिता कथा ॥ १ ॥
सिद्धान्तयोगोद्वहनक्रियायां, विघ्नं च मा ज्ञादिति चिन्त्य शिष्यान् ।
स्वर्गात्समेत्येह क्रियां ततान, तेषां स देवः श्रुतवत्क्रियुक्तः ॥ २ ॥
इत्युपधानसज्ञस्य श्रुताचारस्य वर्णनम् ।
श्रुत्वाऽमुमाद्रियध्वं नो यथागमं तपस्विनः ॥ ३ ॥

॥ इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तावष्टादशस्तम्भे द्विषष्ट्यधिकद्विशततमं २६२ व्याख्यानम् ॥

---

१ अत्र त्वयं चिन्त्यं ।

## त्रिपष्ट्यधिकद्विशततमं २६३ व्याख्यानम् ॥

अथानिह्नवाख्यपञ्चमाचारमाह—

श्रुताक्षरप्रदातॄणां गुरूणां च श्रुतादीनाम् । अनिह्नवोऽयमाचारः पञ्चमः श्रीजिनैः स्तुतः ॥ १ ॥

स्पष्टः । नवरं गुरूणामनिह्नवो नापलपनं यस्य सकाशेऽधीतं स एवाप्रसिद्धोऽपि जातिश्रुतादिहीनोऽपि गुरुतया वाच्यः, न तु स्वस्य गौरवं पन्यकशिष्यवत्कर्तव्यं, गुरुबहुमानं कार्यं, न तु लघोपग्रहणं, अजस्रं गुरुतः शङ्कनीयं, न तु निःशङ्कत्वं विधेयम् । मातङ्गस्त्रीस्पर्शनचिन्तने गुरुणा तद्वृत्तान्ते ज्ञाते श्रीआमनृपः स्वचेतसीति दध्यौ—"अहो ! मदयोग्यत्वं गुरुर्निर्ज्ञातं, इदानीं मुखं कथं दर्शयिष्येऽहं ?"। ततस्तत्पापत्यागार्थं लसल्लोहपुत्रिकास्पर्शकरणोद्यतं तं नृपं श्रीगुरुः श्लोकान् प्रेष्यावोधयत् । अयं दृष्टान्तः प्राग्विस्तरेण लिखितोऽस्ति । अथवा कुमारपालः शुष्कघृतपूरचर्वणसमये मांसभक्षणस्वादं सस्मार, क्षणेन प्राप्तोपयोगो दध्यौ—"अहो ! एतदयोग्यचिन्तनं यदा गुरुर्ज्ञास्यति तदा मज्जीवितं धिक्" । ततः स्वदंष्ट्रापातनोद्यतो नृपः सचिवैः श्राद्धैः शिक्षितः । ततो गुरुदत्तप्रायश्चित्तपदे घृतपूरवर्णाकारं चतुर्दशाधिकसहस्रमितस्तम्भैर्युतं प्रासादं नृपोऽकारयत् । इत्यादिकं श्रुत्वा गुर्वाद्यपलापस्य महादोषत्वं ज्ञेयम् । लोकेऽप्युक्तम्—

एकाक्षरप्रदातारं यो गुरुं नाभिमन्यते । श्वानयोनिशतं गत्वा चाण्डालेष्वभिजायते ॥ १ ॥

तथा श्रुतादीनामपलापो न कार्यः यत्पार्श्वे यावच्छ्रुतमधीतं तावदेव वक्तव्यं, न त्वधिकमूनं वा, मृषा-

नापाचित्तकालुष्यज्ञानातिचाराद्यापत्ते । कस्यचित्तु गुरुश्रुतनिह्नवे सति सर्वगुणहानी रोहगुप्तस्येव स्यात्, तथाहि—अन्तरिकापुर्यां उपवने श्रीगुप्ताचार्य समन्त स्थित । तस्या पुर्यां बलश्री राजाऽस्ति । सूरीणा रोहगुप्तो नाम शिष्योऽन्यत्र ग्रामे स्थित आसीत् । ततोऽसौ गुरुवन्दनार्थं तत्र पुर्यामायातः । तत्र चैक परिव्राजको लोहपट्टेनोदर बद्ध्वा जम्बूवृक्षशाखया च हस्तगृहीतया नगर्यां भ्राम्यति, किमेतदिति लोकेन पृष्टो वदति—"मदीयोदरमतिविज्ञानेन पूरितत्वात् स्फुटतीति लोहपट्टेन बद्ध, जम्बूद्वीपे मम प्रतिवादी नास्तीत्यस्यार्थस्य सूचनार्थं जम्बूवृक्षशाखा हस्ते गृहीता" । ततस्तेन पोट्टशालेन सर्वत्र पुर्यां "शून्या सर्वेऽपि परप्रवादाः, नास्ति कश्चिन्मम प्रतिवादी" इत्युद्घोषणापूर्वक पटहो दापित । तत्पट-हक पुरीं प्रविशता रोहगुप्तेन दृष्ट, उद्घोषणा च श्रुता, तत "अह तेन सार्धं वाद दास्यामि" इत्य भिधाय पटह निषिध्य गुरुसमीपे एत्यालोचना च कृता कथितोऽय व्यतिकरस्तेषा । सूरिणोक्त—"न युक्त त्वया कृत, यत स भूरिविद्याढ्योऽस्ति, स च वादे पराजितो मन्त्रविद्याभि प्रतिवादिन उप-द्रवति, यत —

वृश्चिकान् पन्नगानाखू मृगशूकरवायसान् । शकुनिकाश्च कुरुते स हि विद्याभिरद्भुतान् ॥ १ ॥"

ततो रोहगुप्तेनोक्त—"यद्येव तत्किमिदानीं नष्टु क्वापि शक्यते ? निषिद्धस्तत्पटहक, यद्भाव्य तत्र भवतु" । तत सूरिभि प्रोक्त—यद्येव तर्हि पाठसिद्धा एवैता मम तत्प्रतिपक्षविद्या गृहाण" । का पुनस्ता ? इत्याह—

अह भंते ! कुम्मे कुम्मावलिया गोहा गोहावलिया गोणे गोणावलिया मणुस्से मणुस्सावलिया महिसे महिसावलिया एए णं दुहा वा तिहा वा संखेज्जहा वा छिन्नाणं जे अंतरा ते वि णं तेहिं जीवपएसेहिं फुडा ? हंता फुडा। पुरिसे णं भंते अंतरं हत्थेण वा पाएण वा० कट्ठेण वा० किलिंचेण वा० आमुसमाणे वा० सत्थजाएण वा अभिहणमाणे वा० अगणिकाएण समोडहमाणे तेसिं जीवपएसाणं किंचि आबाहं वा विबाहं वा उप्पाएइ० ? । नो इणट्ठे समट्ठे, नो खलु तत्थ सत्थं संकमइ त्ति । यदि चैवं सूत्रे जीवप्रदेशाना तदन्तराले सम्बन्धोऽभिहितस्तर्हि तदन्तराले ते जीवप्रदेशा किमिति नोपलभ्यन्ते ? गुरु आह—अरूपित्वात्, यथा प्रदीपरश्मयो नूकुड्यर (क) रण्डकादिमूर्त्तवस्तुगता दृश्या सन्ति, न तु केवल आकाशे प्रसृता तथैव जीवो लक्ष्यते प्राणोच्छ्वासनि श्वासधावनवल्गनस्फुरणादीनि देह एव लक्षणानि गृह्यन्ते, न तु तदन्तराले सूक्ष्मकार्मणदेहयुक्ता अपि प्रदेशा लक्ष्यन्ते । अथवा हे शिष्य ! नोजीव स देशः किं जीवाद्भिन्नोऽभिन्नो वा ? भिन्नश्चेत्तदा तेन जीवेन सह पुच्छस्याभेदः कथं ? भिन्नो हि देशोऽन्यत्रापि परमाणुवत्सम्मिलेत्, तस्य देशस्य चान्येन जीवेन सह मिलने तदा बन्धमोक्षानुपलब्धसुखदुःखादिसाङ्कर्यं स्यात् । अथाभिन्नश्चेत्तदा तु जीवान्तर्गत एव स सम्पन्न । तदा राशिद्वयमेव जातं, न तु त्रयं । अथाभिन्नोऽप्ययं देशः स्थानभेदविवक्षया नोजीव इत्युच्यते पुच्छगृहकादिवदिति तर्हि राशिनोऽजीवनामापि प्रतिपद्यता, व्योमादीनामजीवानामप्येव देशसद्भावात्, तथा च राशिचतुष्कं भवेत् । यथा तदेकस्याजीवोऽपि जीवाच्च भिद्यते तथा नोअजीवोऽपि तदेकत्वादजीवाच्च भिद्यते । एवं नयो यावदन्यद्विवादोऽभूत् । अथ गुरो

गुरु प्रोचे—"स्वामिन्! वादः समाप्यतां, मम राज्यकार्यमनया व्यग्रतया सीदति"। ततः सूरि प्राह—"इयत्कालं मयाऽस्य क्रीडया धृतं, अथाऽस्य निग्रहं प्रातरवश्यं करिष्ये"। ततो द्वितीयदिने गुरुरिति नृपं प्राह—"इह पृथिव्यां यत्किमपि विद्यमानं वस्तु तत्सर्वमपि कुत्रिकापणेऽस्तीति सर्वजनानां नगरा च प्रतीतमेव। तत्र कुत्रा स्वर्गमर्त्यपातालभूमीनां त्रिकं कुत्रिकं तदात्मा हट्टः, अत्र हट्टे वणिग् कस्यापि मन्त्राद्याराधितः सिद्धो व्यन्तरसुरः क्रायकजनसमीहितं सर्वमपि वस्तु कुतोऽप्यानीय समर्पयति, तन्मूल्यं द्रव्यं वणिगेव गृह्णाति। अन्ये तु वदन्ति—वणिग्रहीतं सुराधिष्ठितमेवापणं भवति, तत्र मूल्यद्रव्यं सुर एव स्वीकरोति"। अथ गुरुः सपरिकरस्तत्र गत्वा रोहगुप्तसमक्षं कुत्रिकापणव्यन्तरसुरं जीवं देहीति याचितवान्। सुरो जीवं शुकसारिकादिकं दत्तवान्, अजीवं देहीति याचितस्त्वजीवमुपलखण्डादिकं दत्त्वा कृतार्थो जायते। नोजीवं याचितः पुनरप्यजीवमुपलखण्डादिकमेव ददाति, नोशब्दस्य सर्वनिषेधपरत्वात्। चरमे तु नोअजीवलक्षणे विकल्पे जीवमेव शुकादिकं ददाति, द्वयोर्नञोः प्रकृतार्थगमकत्वान्नोशब्दस्य च सर्वनिषेधकत्वादिति। न तु स कुत्रिकापणदेवो नोजीवं जीवस्यैकदेशरूपं क्वापि विकल्पे ददातीति जीवाजीवौ द्वावेव राशी, न तु तृतीयः, असत्त्वात्, खरविषाणवदिति। ततः सूरिः शिष्यमूचे—"कदाग्रहं मुञ्च, विश्वे नोजीवश्चेदस्ति तर्हि सुरः कथं नादात्?"। इत्यादिभिश्चतुश्चत्वारिंशदधिकशतप्रश्नैः सूरिस्तं द्रुतं नृपसाक्षिकं निजग्राह। इह द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणाः षण्मूलपदार्थास्तेन षडुलूकेन कल्पिताः। तत्र द्रव्यं पञ्च महा-

नानि वायो दिगात्मा मनश्चेति नव द्रव्याणि । गुणा रूपरससङ्ख्याबुद्धिद्वेषादय सप्तदश । कर्म पञ्चविध उत्क्षेपणापक्षेपणादिक । सामान्य त्रिविधं । विशेषसमवायौ च । एव सर्वे षट्त्रिंशज्जाता । एते सर्वेऽपि प्रकृत्या १ अकारेण २ नोकारेण ३ उभयनिषेधत ४ श्चैतैश्चतुर्भिर्भेदैर्गुणिताश्चतुश्चत्वारिंशदधिक शत स्यात्ति । तत्पृष्ट कुत्रिकापणदेव पृथ्वी देहीति पृष्टे ददाति प्रकृत्या जात उपपदमुक्त शुद्ध च १ । अपृथ्वी देहीति दत्त जलादिक दत्ते २ । नोपृथ्वी याचितो नोशब्दस्य देशनिषेधे लेष्टोरेव देश तत्खण्ड दत्त सर्वथा निषेधार्थे नोशब्दे नोपृथ्वीं जलादिकमेव दत्ते ३ । नोअपृथ्वीं देहीत्युक्ते देव पृथ्वीं दत्ते ४ आपत्त्यादर्थं विज्ञाय्य । एव जलादिष्वपि चत्वारो भेदा सर्वत्र यथायोग योज्या । निश्चयनयमत तु द्वावेव पदार्थाविति स्थित । इत्यादिना बोधितोऽपि यदि स्वकदाग्रह नामुञ्चत्तदा गुरुणा खेलसप्रत्यनीक सङ्घगुप्त य मान्य करिष्यन्ति ते राजद्रोहिणो भाविन" । तत स वैशेषिकशास्त्र स्वय स्वपदामामति ।

चतुश्चत्वारिंशदाढ्यैर्वर्षाणां पञ्चभि शतै । श्रीवीरमुक्तेर्जातस्य ज्ञात षष्ठस्य चोदितम् ॥ १ ॥

षड्द्रव्यपूर्णं जिनदृष्टनिश्च, चोत्थापयन् द्रव्यगुणादिपद्धम् ।

तथ्य च तत्त्वंशिकरादिपक्ष, वैशेषिक षष्ठमनिह्नवोऽभूत् ॥ २ ॥

---

१ मकारादिकत्व चित्यम् ।

पडूत्तुको देवगुरुश्रुतादि–नैकव्यजनादगमच हानिम् ।
आचारत पञ्चमत श्रुतादि–शिष्यैर्न त्रष्टैर्नचितव्यमार्यैं ॥ ३ ॥
॥ उत्यब्ददिनपरिमितोपदेशमप्रहाख्यायामुपदेशप्रासादमन्थवृत्तावष्टादश-
स्तम्भे त्रिषष्ट्यधिकद्विशततम २६३ व्याख्यानम् ॥

## चतु षष्ट्यधिकद्विशततमं २६४ व्याख्यानम् ॥

अत्र व्यञ्जनानिह्नवाख्यपष्ठश्रुताचारमाह—

नाध्येतव्य श्रुत घोषवर्णन्यूनाधिकादिभि ।
व्यञ्जनानिह्नवाख्योऽयमाचार षष्ठम स्तुत (षष्ठ ईरित ) ॥ १ ॥
व्यञ्जनभेदतोऽर्थाना क्रियाणा भेदो जायते ।
तेनाज्ञानं मुनेः स्यात् के के दोषा भवन्ति न ॥ २ ॥

स्पष्टौ । अयमर्थं अत्र भावना, तथाहि—व्यञ्जनान्यक्षराणि तेषा भेदोऽन्यथाकरण तस्मादनेके दोषा भवन्ति । यत श्रीजिनविमलगणिकृते श्रुताशातनाः चतुर्दशविधा प्रोक्ता —"ज वाइद्ध वच्चामेलिय०" इत्यादि, इत्यत्र विपर्यस्तमात्रानदोष प्रकारेण याऽऽशातना तथा योऽतिचार कृतस्तस्य मिथ्याद्-

कृतमिति सर्वत्र योज्य १ । आम्रेडित द्विस्त्रिरुक्त कोलिकपायसवत् २ । हीनाक्षरमक्षरन्यून ३ । अत्यक्षरमधिकाक्षर ४ । पदहीन पदेनवोन ५ । विनयहीनमकृतोचितविनय ६ । घोषहीनमुदात्तादिघोषरहित ७ योगरहित ८ । सुष्ठु दत्त गुरुणा दुष्ठु प्रतीच्छित कलुषितान्तरात्मनेति १० । अकाले कृत स्वाध्याय ११ । काले न कृत स्वाध्याय १२ । अस्वाध्यायिके स्वाध्यायिक १३ । स्वाध्यायिकेऽस्वाध्यायिकमिति १४ । तत्र व्यञ्जनान्यथाकरण प्राकृतस्य सूत्रस्य संस्कृतीकरण यथा सयोगाद्विप्रमुक्तस्य १ । पदाना पश्चानुपूर्व्या व्युत्क्रमेण वा पठन यथा विप्पमुक्कस्स सजोगा २ । तथा पदाना सनामभिः परावर्तन वा यथा सवधा विवज्जिअस्स ३ । वर्णान्तरकरण वा यथा सजोगा इत्यत्र सकारस्य स्थाने यथेछ पठति ४ । वर्णवैपरीत्यकरण वा यथा सजोगा वि० इत्यस्य स्थाने वियोगादि जणति ५ । एवमर्थस्य व्यञ्जनार्थोभयस्य चान्यथाकरणे न्यूनाधिक्त्वे च दोषा विज्ञाव्या । तत्र व्यञ्जनान्यथाकरणे चैत्यवन्दनादिसूत्राणि संस्कृतभाषया करोमीत्युक्त्वा पाराञ्चितप्रायश्चित्त प्राप्त श्रीसिद्धसेनदिवाकर, तस्य ज्ञात प्रागेव निगदितमिति । तथा व्यञ्जनाधिक्ये ज्ञातमिदम्—

एकदा पत्तने कुमारनृप सामन्तमन्त्रिसार्थवादादिपरिवृत श्रीजयसिंहदेववृद्धमन्त्रिण पप्रछ यत् "अह श्रीसिद्धनृपतेर्हीन समानोऽधिको वा ?" मन्त्रिभिरछलप्रार्थनापूर्व सिद्धराजनृपस्याष्टनवतिर्गुणा द्वौ च दोषौ, स्वामिनस्तु द्वौ गुणौ तत्सङ्ख्या एव च दोषा । इति मन्त्रिवाक्यादनु दोषमय आत्मनि विराग दधानो यावच्छुरिकाया चक्षु क्षिपति तावत्तदाशयवेदिभिस्तैरेव विज्ञप्त —"स्वामिन् ! अस्माभि-

र्वैर्हिर्बुध्याऽविचार्यैवमुक्त, पर तत्त्वबुद्ध्या तु देव एवाधिक"। राजाह—"कथ ?"। मन्त्रिनिरुक्तं—"निष्कनृपतेरष्टनवतिर्गुणा सम्रामानुजटताक्लीवत्वदतादोषान्या तिरोहिता। कार्पण्यादयो देवदोषास्तु समरशूरत्वापरनारीसहोदरतागुणान्यामपकृता इति देव एव सर्वगुणशिरोमणिसत्त्वपरस्त्रीनान्धनतादिगुणाधार"। इति मन्त्रिवच श्रवणसतुष्टान्तरात्मा जातो नृप। तदैवैन विदुषा पठितः श्लोको नृपमुद्दिश्य, यथा—

पर्जन्य इव भूतानामाधार पृथिवीपति। विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥ १ ॥

वाक्यमिदमाकर्ण्य "अहो! राज्ञे मेघोपम्या सुष्ठु दत्ता" इति कुमारभूपेन सर्वव्याकरणेषु अप्रशस्तप्रयोगेऽनिश्चिते सर्वेष्वपि सामाजिकेषु स्पुल्लानि कुर्वाणेषु मन्त्रिकपर्दी महाविद्वत्त्वात्त्रपयाऽधोमुखो जात। राजा त तथा दृष्ट्वा पृष्टवान्। तेन निवेद्य—"देव! उपम्याशब्द शास्त्रनिरुद्ध, तस्मिन् प्रयुक्ते श्रीदेवेनासावमधोमुखत्वमेव युक्त, परमरातक शृणुत, न तु मूर्खो राजेति, प्रतीपभूपाखमण्डलेऽप्यपकीर्ति प्रसरति, अतोऽस्मिन्नर्थे उपमान औपम्यं उपमा इत्याद्या शब्दा शुद्धा" इति तद्वचनप्रेरितेन शब्दव्युत्पत्तिहेतवे पश्चाशद्वर्षदेशयेन राज्ञा श्रीदेवगुरुपादान् पर्युपास्य तत्प्रसादासादितसिद्धसारस्वतमन्त्राराधनसारस्वतचूर्णसेवनादिभिः सुप्रसन्नश्रीभारतीप्रसादाद्वृत्तित्रयकाव्यानि द्व्याश्रयादीनि एकेन वर्षेणावगम्य श्रीचतुर्विंशतिजिनवर्णनद्वात्रिंशिका कृता, तस्या आद्य काव्यमिदम्—

यत्राखिलश्रीश्रितपादपद्मं, युगादिदेव स्मरता नरे (रे) न।
सिद्धिर्मयाप्या जिन त जयन्त, युगादिदेव प्रणतोऽस्मि नित्यम्॥ १ ॥

तत शास्त्रविचारचतुर्मुख इति निरदमजितमिति । अथवा व्यञ्जनाधिक्येऽन्यज्ञातमिद—पाटलिपुत्रपत्तने नवम नन्दनृप प्रतिज्ञापूर्वकमुत्थाप्य चाणाक्येन मयूरपोषकग्रामे महत्तरदौहित्रश्चन्द्रगुप्तो राज्ये निवेशित, तस्याङ्गजो बिन्दुसारनृप, तत्सूनु पुनरशोकश्रीनृप । तेन स्वतनयाय कुणालाह्वयाय बाल्येऽपि भुक्त्यर्थमवन्तिपुर दत्त, यतोऽत्र स्थितस्यापरमातृणामुपद्रवो नाभवीति । ततस्तत्र स्थित स बालो राजनियुक्तानुजीविभि रक्ष्यमाणो जीवितवत् । क्रमेण स साम्राष्टहायनोऽभूत् । ततो नृपेण स्वाभियोगवचनैस्तद्वयो विद्याग्रहणयोग्यं मत्वा कुमाराय स्वयमिद लेखे लिखित—"हे कुमार ! त्वयाऽधीतव्यमिति मदाज्ञाऽचिरेण विधेया" इति कन्नतं लिपीकृत्य यदा नृप किञ्चित्कार्यव्यग्रोऽभूत्तदाऽपरमाता तत्रागत्य तल्लेख परिवाच्य दध्यौ—"कुणालपुत्रे सर्वाङ्गशुद्धे सति मत्पुत्राय राज्य न दास्यति, अत किञ्चित् पत्रमध्ये विरूप लिखामि"। तत अधीतव्यमित्यत्राद्याक्षरे निष्ठीवनार्द्रीकृतया नेत्राञ्जनशलाकया नेत्रात्कज्जलमाकृष्य बिन्दुक ददौ, अनुस्वारो मस्तके कृत तदा अंधीतव्यमिति जात, अहो मात्राधिक्ये कथमहितार्थो जात । अथाशोकोऽपि प्रमादेनाननुवाचितमेव हि त लेख मुद्रयामास, उज्जयिन्या प्राहिणोच्च । कुमारोऽपि त लेख पितृनामाङ्कमुद्रालङ्कृतमस्तक द्वाभ्या पाणिभ्यामाददे, मूर्ध्नि च न्यधात् । तदनु तल्लेख वाचयित्वा नृत्त निषण्ण उदश्रुनेत्रश्च लेखार्थं वक्तुमक्षमोऽभूत् । अन्येऽपि तं

सान्त्वयित्वा नियुक्ता प्रोचु —"हे कुमार ! किं खेदमुद्वहसि ? पुनरस्य निर्णयं करिष्याम"। स प्राह—"मौर्यान्वये कोऽपि गुर्वाज्ञालङ्घकोऽद्यापि न जात, यदि प्रथममेवाज्ञामहं लोप्स्यामि तदा मत्कृत एना-ध्वाऽन्येषामपि भविष्यति"। तत स नेत्रे स्वयं तप्तशलाकयाऽनक्ति स्म। नृपस्तद्व्यतिकरमवगम्य दध्यौ—"धिक् मूर्खलेखक मात्मानं" इत्युच्चैर्निनिन्द "धिङ्मा सम्यक् पुनरनालोक्य लेखमेनं"। तत परंपरया तदाऽऽत्मानुनिष्पादितं कार्यं विज्ञाय श्रीतातिदुःखत्र निर्धार्य दध्यौ—"अधुनाऽथ पुत्रो-ऽयं राज्याय सम्प्रत्ययो न स्यादिति, अहो ! मयि यस्येदृशी भक्तिस्तस्येदृशमागत"। तत कुणा-लायाऽन्यत्कश्रीमदुज्जयिन्यां ग्रामं ददौ, तदपरमातुः पुत्रायोज्जयिनीं पुनर्ददौ। कुणालस्य क्रमेण परेद्यवि शरच्छ्री नाम पत्नी सूनु सम्प्रतिनामा जात। तत्पुत्रे महति सजाते कुणालो राज्यलिप्सया पाटलिपुत्रमा-गात्। तत्र गीतविनोदेन स्वेच्छया स पुरे भ्रमन् सर्वजनानां प्रियो बभूव। तत्पुत्रो यत्र यत्र विज्ञान् रागान् तत्र तत्र गीताकृष्टाः पौराः पुरस्सरयन्। लोकमुखात्तद्गान्धर्वकलाकुशलं त नर श्रुत्वा गीतश्रवणो-त्सुको नृपस्तमन्धं नरमाहूय यवनिकागुप्तं कृत्वा गातुं समादिशत्। सोऽपि यथास्थानमन्त्रमध्यतारे स्वान्तिः स्वरैः पञ्चमरागमीदृशं रागं पोषयन् जगौ—

प्रपौत्रश्चन्द्रगुप्तस्य बिन्दुसारस्य नप्तृकः। एषोऽशोकश्रिय पुत्र अन्धो मार्गति काकिणीम् ॥ १ ॥

पञ्चमस्वरमानेन गीयमानं नृप श्रुत्वा पप्रच्छ—"किंनामा त्वं हे गायक ! आख्याहि"।

स उवाच नरेशास्मि कुणालो नाम नन्दन। त्वदाज्ञयेममीदृशा योऽन्ध स्वयमजायत ॥ १ ॥

ततो जवनिका जवादपसार्य नरेश्वर स्वसूनुमुपलक्ष्योदश्रुः परिषस्वजे। राजोचे—"वत्स! किं तुभ्य ददामि?"। स स्माह—"हे देव! अहं काकिणीं याचे"। तदा नृपो मन्त्रिणं पप्रच्छ—"एष किं याचते?"। मन्त्र्याह—"स्वामिन्! राजपुत्राणा काकिणीशब्देन राज्यमुच्यते"। राजा प्रोवाच—"हे वत्स! किं राज्येन करिष्यसि? दैवादपहृतचक्षुस्तव तन्नार्हं"। तत स नृप व्यजिज्ञपत्—"तात! मम सुतो जातोऽस्ति, स राज्येऽभिषिच्यता"। अशोकश्री पप्रच्छ—"कदा तव सुत उत्पेदे?"। स स्माह—"स्वामिन्! सम्प्रत्येव जात"। ततो नृपस्तमर्भक समानाययत्। त पौत्रमुत्सङ्गे संस्थाप्य सम्प्रतिरिति तस्य नामाकरोत्, ततो निजे राज्ये न्यवीविशत्। ततः स सम्प्रतिर्वयसा विक्रमेण श्रिया च वृद्धिमासादयामास। तत आजन्म परमार्हत स दक्षिणभरतार्धं साधयामास। इति ज्ञात श्रुत्वा श्रीसिद्धान्तवाक्ये वर्णे च कदाचिदपि न व्यञ्जनाधिकत्व विधेयं इति गुरमन्त्र। अथ कदाचिद्यथार्थकरणार्थं पादलिप्तसूरिवर्णितदृष्टान्ततो मात्राधिक्यकरण श्रेयस्करं जात, तच्चरित्र पूर्वं लिखितमस्ति ततोऽत्र न प्रतन्यते।

अथ व्यञ्जनाना न्यूनत्वकरणेन महादोष प्रभवति, विद्याधर इव चिन्तितफल न प्राप्नोति, तथाहि—राजगृहे नगर श्रीवीरवन्दनार्थं समागच्छता श्रेणिकेन मार्गे एको विद्याधरो व्योमत उत्पत्योत्पत्य पतन् दृष्ट। विस्मय गतेन नृपेन श्रीजिनो विज्ञप्त—"स्वामिन्! किमित्यय खेचरो विधुरितपक्ष पतत्रीव व्योम्नि किञ्चिदुत्प्लुत्योत्प्लुत्य पुनर्भूमौ पतति?"। भगवतोक्त—"विद्याक्षरविस्मरणात्"। तदन्वभयकुमारो विद्याभृदभ्यर्णं एत्य त स्माह—"भो विद्याधर! यदि मा समानविद्यासिद्धिक करोषि तदा त्वद्विद्या-

दरमुपज्ञ्य कथयामि"। प्रतिपन्न च तया तेन। अन्नयस्य चैकस्मादपि पदादनेकपदान्यूहनशक्तिरस्ति पदानुसारिमहत्तमादित्यजयेन तद्विस्मृतविद्याक्षराणि पूरितानि। तानि यथास्थितान्येव विज्ञाय हृष्ट स विद्याधरो विद्यासाधनोपायमुक्त्वा मैत्रीं दृढा विस्तार्य स्वस्थल प्रापेति दृष्टान्त श्रुत्वा न्यूनाक्षरपठन यथार्थस्यद्द न स्यादिति।

अथवा मस्य स्थाने शकारपठनेन पाण्डित्य न लभ्यते। यथैको विद्वान् काशीदेशत एकत्र ग्रामे गमेत। तत्र लोकमुखेन्यस्मद्ग्रामिकविप्रवर्णन श्रुत्वा स तद्गृह गतो वादलिप्सया, सोऽप्यादरमर कृत्वा वाक्मध्य स्वपाण्डित्य दर्शयति। तदा नवीन विप्र दृष्ट्वा स ग्रामिकविप्रो महता शब्देनोवाच—"ज्रो विप्र! किमथमत्रागमनप्रयोजन? यदि कोऽपि तव शदेहोऽस्ति तर्हि पृच्छ"। तदा स महाविद्वान् दध्यौ—"अहो! अय पण्डिताभासः शब्दशुद्धिं विना पङ्क्तवदारटति, अत शिक्षा ददामि।

शन्देहोऽस्ति त्वया प्रोक्ते सदेहा पद्दगोऽजनन्। ते सर्वे निश्चय जग्मु किम यच्छिम रे जक॥ १॥

इति श्रुत्वा कण्ठाद्यादिस्वस्थानविप्रमुक्त व्यञ्जन नोच्चार्यमिति स्थितम्।

न्यूनाधिकव्यञ्जनसूत्रपाठक, अर्थप्रियात्रेदसराप्नुयाद्ध्रुवम्।
तस्मादनर्थं गुरुपाश्वमस्ते, सिद्धान्तपाठोच्चरण सुशिक्ष्येत्॥ १॥

॥ इत्यब्ददिनपरिमितोपदेशसग्रहाख्यायामुपदेशप्रासादस्य वृत्तावष्टादशा-
सम्भे चतु षष्ठ्यधिकद्विशततम २६४ व्याख्यानम्॥

## पञ्चपष्ट्यधिकद्विशततमं २६५ व्याख्यानम् ॥

अथार्थानिह्नवाख्यसप्तमाचारमाह—

शब्दार्थानामलोपाह्व आचार सप्तमः शुभ । तल्लोपेन महत्पाप पुण्य वर्यं तदाश्रयात् ॥ १ ॥

स्पष्ट । नवर शब्दार्थानामनिह्नवार्थं हेमसूरिसंबन्धो ज्ञेय , तदाचारलोपे च महत्पाप वचनागोचर । अत्रार्थे मातृकापाठकजरटकज्ञातमिति । तदाश्रयस्तदाचारसेवन तस्मात्पर्य श्रेष्ठं पुण्य स्यात् । अत्रार्थे जरटकसंबन्ध एव धार्य. इति । हेमाचार्यसंबन्धस्त्वय—

अणहिल्लपुरपत्तने श्रीसिद्धराजजयसिंहे राज्यं कुर्वत्यन्यदा कलिकालसर्वज्ञैः श्रीहेमाचार्यैर्वाच्यमान पाण्डवचरित्रमाकर्ण्य दुर्मुखैर्विज्ञप्तो नृप —"हे देव ! पश्चापि पाण्डवा हिमालये सिद्धिमगुरिति वेदव्यासवाणीमसौ हेमाचार्यः शत्रुञ्जये सिद्धास्त इति कथनेन दूषयतीत्यसमञ्जस" । ततो राज्ञाऽऽहूता श्रीहेमसूरयो नृपसभा प्रापु । "हे भगवन् ! अधुना वणिजा पुरः किं व्याख्यायते ?" इति पृष्टा "पाण्डवचरित्र" इति प्रोचु । "तत्र च पाण्डवाः कथं क्व सिद्धाः ?" इति पुन पृष्टा प्राहुर्गुरव — "स्वीकृतजैनागमार्थमयलम्ब्य निर्मलसंयमतपोनिर्दुष्टाष्टकर्माणि क्षपयित्वाऽनशनेनानेकमुनिवृता सिद्धाद्रौ सिद्धा" । तदा नृपः प्राह—"हिमाचले हिमेन पाण्डवाः सिद्धा इतिव्यासवाक्यप्रामाण्याज्जयकथमप्रमाण" इतीरिताः सूरयः प्रोचिरे—"हे राजेन्द्र ! शृणु भारतभारती, तथाहि—सगरसूनो पार्थ-

नारघोरपीनिद्ध भूमिनिपतितमान मशीत्रितदानवीतं श्रीकर्णनरेन्द्रं दारुतयरीरणगं निनिद्रेदीनि तद्-
स्तुपागत स्वीकृतनिमरूपो त्रिश्वेश्वरः। श्रीकर्णोऽप्यन्यत्किञ्चित्रामीति निनित्व यारम्यममान्नेन
पापाणेन स्वर्णरेखाघितान् स्वद तान् पातयितुमुपचक्रमे । तुष्टोऽस्मीति वदन् प्रादुरभूत् पुरुषोत्तम ।
"हे परमेश्वर ! तव दर्शनेन सिद्धोऽस्मि, पर यदि तुष्टोऽसि तदा यत्र कोऽपि न दग्धस्तत्र मे दाहकर्म
कुरु" इति वादिन श्रीकर्णमादायान्यत्र तादृश स्थानमलभमानो हरिः पयोधौ सम्नोरमस्य गिरे शृङ्ग
तादृश मत्वा यावत्कर्णचिता कर्तुमुपचक्रमे तावदिति नभोगीरभूत्—

अत्र भीष्मशत दग्ध पाण्डवाना शतत्रयम् । दुर्योधनसहस्रं च कर्णसंख्या न विद्यते ॥ १ ॥

तेन यदि पाण्डवाना शतत्रयी तत्र दग्धा तदाऽस्माकमपि पञ्च पाण्डवा शत्रुञ्जये सिद्धाः, श्रीमता-
मपि पाण्डवा हिमालये सिद्धा इति किमसमञ्जसम् !" इत्युक्त्वा तुष्टेन राज्ञा निगृह्य प्रतिश्रयमगु ।
इति दृष्टान्तं श्रुत्वा महति कष्ट उत्पन्नेऽपि बुद्धिमान् सिद्धान्तशब्दार्थान् दूषयति इति परमगुरुनिज्ञ
परमरहस्य निर्णीत तदासेव्य ।

अथ मातृकापाठकजरटकज्ञातं निगद्यते—धनसारे ग्रामेऽतीव मूर्खा बहवो जरटका वसन्ति ।
आत्मना मध्ये कोऽपि पण्डितो नास्तीति मत्वा तैरन्येद्युः सम्भूयैको जरटको नन्दनाख्य कस्यापि पण्डि
तस्य पार्श्वे पठनार्थममोचि । जातिविशेषेण वृद्ध वाचिन सोऽपि नन्दको वर्षत्रयेण मातृकापाठमेवाधी-
तीत् । "वेदमाताऽनेनाधीता" इति प्रतिपाद्य तेन पित्रा स तेषा जरटकाना मध्ये अर्पित । महाकष्टैरपि

# पञ्चषष्ट्यधिकद्विशततमं २६५ व्याख्यानम् ॥

अथार्थानिह्नवाख्यसप्तमाचारमाह—

शब्दार्थानामलोपाह्व आचारः सप्तमः शुभः । तल्लोपेन महत्पापं पुण्यं वर्यं तदाश्रयात् ॥ १ ॥

स्पष्टं । नवरं शब्दार्थानामनिह्नवार्थे हेमसूरिसंबन्धो ज्ञेयः, तदाचारलोपे च महत्पापं वचनागोचरं । अत्रार्थे मातृकापाठकभरटकज्ञातमिति । तदाश्रयस्तदाचारसेवनं तस्माद्वर्यं श्रेष्ठं पुण्यं स्यात् । अत्रार्थे भरटकसंबन्ध एव भाव्य इति । हेमाचार्यसंबन्धस्त्वयं—

अणहिल्लपुरपत्तने श्रीसिद्धराजजयसिंहे राज्यं कुर्वत्यन्यदा कलिकालसर्वज्ञैः श्रीहेमाचार्यैर्वाच्यमानं पाण्डवचरित्रमाकर्ण्य दुर्मुखैर्विज्ञप्तो नृपः—"हे देव ! पश्चापि पाण्डवा हिमालये सिद्धिमगुरिति वेदव्यासवाणीमसौ हेमाचार्यः शत्रुञ्जये सिद्धास्त इति कथनेन दूषयतीत्यसमञ्जसं" । ततो राज्ञाऽऽहूता श्रीहेमसूरयो नृपसभां प्रापुः । "हे भगवन् ! अधुना वणिजां पुरः किं व्याख्यायते ?" इति पृष्टाः "पाण्डवचरित्रं" इति प्रोचुः । "तत्र च पाण्डवाः कथं क्व सिद्धाः ?" इति पुनः पृष्टाः प्राहुर्गुरवः— "स्वीकृतजैनागमार्थमवलम्ब्य निर्मलसंयमतपोनिर्दुष्टाष्टकर्माणि क्षपयित्वाऽनशनेनानेकमुनिवृताः सिद्धाद्रौ सिद्धाः" । तदा नृपः प्राह—"हिमाचले हिमेन पाण्डवाः सिद्धा इतिव्यासवाक्यप्रामाण्याद्भवद्वचनं वयमप्रमाणं" इतीरिताः सूरयः प्रोचिरे—"हे राजेन्द्र ! शृणु भारतभारती, तथाहि—समरभूमौ पार्थ-

शरधोरणीविद्ध भूमिनिपतितमाजन्मदानशौण्डं श्रीकर्णनरेन्द्रं दातृत्वपरीक्षार्थं किञ्चिदेहीति वद-न्नुपागतः स्वीकृतविप्ररूपो विश्वेश्वरः । श्रीकर्णोऽप्यन्यत्किञ्चिन्नास्तीति विचिन्त्य यावत्स्वयमादत्तेन पाषाणेन स्वर्णरेखाञ्चितान् स्वदन्तान् पातयितुमुद्यतस्तावत्तुष्टोऽस्मीति वदन् प्रादुरासीत् पुरुषोत्तमः । " हे परमेश्वर ! तव दर्शनेन सिद्धोऽस्मि, परं यदि तुष्टोऽसि तदा यत्र कोऽपि न दग्धस्तत्र मे दाहकर्म कुरु" इति वादिनं श्रीकर्णमादायान्यत्र तादृशं स्थानमलभमानो हरिः पयोधौ स्तम्भोपमस्य गिरेः शृङ्गं तादृशं मत्वा यावत्कर्णचितां कर्तुमुद्यतस्तावदिति नभोगीरभूत्—

अत्र द्रोणशतं दग्धं पाण्डवानां शतत्रयम् । दुर्योधनसहस्रं च कर्णसंख्या न विद्यते ॥ १ ॥

तेन यदि पाण्डवानां शतत्रयी तत्र दग्धा तदाऽस्माकमपि पञ्च पाण्डवाः शत्रुञ्जये सिद्धाः, श्रीमतामपि पाण्डवा हिमालये सिद्धा इति किमसमञ्जसम् ?" इत्युक्त्वा तुष्टेन राज्ञा विसृष्टाः प्रतिश्रयमगुः । इति दृष्टान्तं श्रुत्वा महति कष्ट उत्पन्नेऽपि बुद्धिमान् सिद्धान्तशब्दार्थान् दूषयति इति परममुनिभिः परमरहस्यं निर्णीतं तदासेव्य ।

अथ मातृकापाठकजरठदृष्टान्तं निगद्यते—धनसारे ग्रामेऽतीव मूर्खा बहवो जरठका वसन्ति । आत्मनां मध्ये कोऽपि पण्डितो नास्तीति मत्वा तैरेकोऽपि सज्जूयैको जरठको नन्दनाख्यः कस्यापि पण्डितस्य पार्श्वे पठनार्थममोचि । जातिविशेषेण जडा वाडिशा सोऽपि नन्दको वर्षत्रयेण मातृकापाठमेवापाठीत् । "वेदमाताऽनेनाधीता" इति प्रतिपाद्य तेन विज्ञाः स तेषां जरठकानां प्रत्यर्पितः । महाजनैस्तैरपि

वेदमाताऽनेन पठितेति महापण्डितधिया स मेने। किं बहुना? यदयं वक्ति तत्ते वितर्करहिता सन्त सृजन्ति। एकदा रात्रौ प्रदीपनेन समग्रेऽपि ग्रामे दग्धे क्वाप्येकस्य तरोरधो दग्धान् काकान् पतितान् विलोक्य तैरूचे—"हे नन्दक! किममी दग्धा काका भक्ष्या न वा?" इति तदुक्तोऽसौ जगाद— "वेदमातरि क इति काका ख इति खाद्या. तेन सद्योऽमी भुज्यन्ता" इति तदुक्तास्ते सर्वेऽपि तथैव कर्तुमुद्यता केनापि वैदेशिकेन पण्डितेनावलोकिता पृष्टाश्च ते तस्मै नन्दकोक्तमूचिरे। "अहो! महामूर्खा अमी" इति मत्वा तेनाभाणि—"भो भरटका! किमिदमकार्यं कुरुथ?"। तत स प्राह वेदमातृकोक्तवाक्यार्थं स्वमतिकल्पित—"क इति काका ख इति खाद्या ग इति गणा घ इति घना पुष्टीभूता" इत्यादर्थमनेकपापशब्दैर्दूषित तदुक्त वाक्य श्रुत्वा स पण्डित कृपार्द्रचेता इति युक्त्या त प्रेरयामास—"भो नन्दक! कृपाधर्मनिन्दक! किमनर्थं तनोषि? वेदमातृकायाः सम्यगर्थस्त्वया न निश्चित, शृणु तत्त्व— "वय इति तथैव सत्य यावत्पर दध इति दग्धा काका न इति न भक्षणीया इत्यादिसम्यगर्थं परित्यज्य स्वकल्पनयाऽनल्पजल्पन न योग्य"।, इत्यादियुक्तिभिर्बोधितास्तेऽकार्यनिवृत्ता सर्वेऽपि त परोपकारिण पण्डितमपूजयन्।

यो यथाऽत्र समुपैति विबोध, त तथैव हि नयेत विबोधम्।
यत्क्खेतिवचनाद्विकल्पनो बोधितस्त्वथदपेसिनवाक्यात् ॥ २ ॥

अत्र दृष्टान्तमध्ये नन्दकजरटकृतोऽर्थो हेयः, पण्डितनिवेदितार्थस्तूपादेय इति सम्यग्दृष्टान्तो ज्ञेय इति भावार्थः । अथ दक्षनरो यथार्थग्रहणार्थं सम्यक् प्रयत्नं करोतीत्याह—

यथार्थं श्रोतु समीहा भृशं कार्या दृढादरैः । श्रमणोपासकैर्नित्यं गुणैः गुरावुपागते ॥ १ ॥

स्पष्टं । अत्र श्लोकभावार्थस्तु कुपकडिकश्राद्धज्ञातेन ज्ञेयं, तथाहि—एकस्मिन्नगरे श्रीरत्नाकरसूरि मकलशास्त्रकोविदः स्वपरशास्त्ररहस्यवेदी बभूव । स सूरी राजसभायामजयमेति । तत्रानेके विद्वांस साहित्यतर्कछन्दोव्याकरणान्तर्लापिकादिकुशलिन सूरिणाऽनेकधा निर्जितास्ते सूरिनाम श्रुत्वा मौनं दधिरे । आचार्योऽप्येकं पदमात्रमादाय तदनेकार्थसपृक्तं सृजति, तेन राजसमद्धि राज्ञाऽनेकार्थवादीति विरुदं तस्मै दत्तं । नित्यं राजससदं सुखासनसंस्थितः समेति । क्रमेण हीयमानचरणगुणो जातः । नृपमन्त्रिसामन्तादिभिः प्रदत्तमशनं वसनं चादत्ते । राजादीन् प्रसन्नान् विधाय मणिमाणिक्यमुक्ताफलादिधनं धनमर्जितं । इत्यादिना गारवत्रययुक्तो बभूव, परं कदाचिदपि श्रीमत्परमात्मवचनसापेक्षतां न जहाति, प्रमादादिभिः श्रीमज्जगद्गुरुप्रणीतं यथार्थावलोकितवस्तुतत्त्वं न दूषयति, प्ररूपणापक्षस्तु यति-निमल्लोऽस्ति तस्य । अथान्यदाऽन्यग्रामवास्येकः श्राद्धो जीवाजीवतत्त्वज्ञः साधूनां पितृ ( ता ) भ्रातृस-मश्च घृतविक्रयार्थं तत्पुरे समागात्, अनेककूपिकाभृतं घृतं विक्रीणाति स्म, तेन लोके कुपकडिकश्राद्ध इति नाम प्रथितं । अथैकदा स रत्नाकरसूरिमनेकद्विजवादिवृन्दैः परिवृतं सुखासनास्थितं नृपोपन्नीविभिः सेवितं वीक्ष्य दध्यौ—"अहो ! अयं शासनप्रभावकगुणयुक्तः सूरिः प्रमादमग्नो जातः, एतदग्रे

अपरो मम न योग्यं, यतो मत्प्राणः कः पाठविधिं निरूपयति ? तथाप्यनेहेऽस्य किं सर्वथा भ्रष्टो जातोऽधुना देशना ?" इति ध्यात्वा राजपथ एव विधिपूर्वकं गुरुं नत्वा स्तुतिं चकार—

गोयम सोहम जंबू पभवो सिज्जंभवो अ आयरिया ।
अन्नेऽवि जुगप्पहाणा तुह दिट्ठे सव्वेऽवि ते दिट्ठा ॥ १ ॥

इत्यादि श्रुत्वा गुरुर्नम्रमुखं कृत्वा त प्राह—"द्विकाला क्षमराजोपमानं न विजानाति, यतस्तेषां महागुणिनामध्यवसायस्य समयगताध्यवसायः समग्रेऽपि मदीयजन्ममध्ये यदि समेति तेनाप्यहं निर्मलीजातो' इति श्रुत्वा स दध्यौ—"अहो ! धन्योऽयं सूरिः, अनेकमिथ्यात्वादिसंपृक्तोऽपि श्रीत्रिभुवनैकशरणस्य स्वल्पमपि न त्यजति अतः सर्वथा न प्रतिपातिः । ततो गुरावुपाश्रयं समागते स श्राद्धस्तत्र विधिना वन्दित्वा देशनां श्रुत्वा "दोससयमूलजालं०" इत्युपदेशमालायाः श्रीवीरशिष्यधर्मदासगणिविरचिताया गाथाया अर्थं पप्रच्छ । ततः स सूरिः स्वबुद्ध्या व्याकरणनाममालाद्यनुसारेण तदीयमर्थं वक्तुमुद्यतः व्यवनोत् । स श्राद्धः श्रुत्वा विनयेनावोचत्—"अहो ! स्वामिन् ! धन्या युष्मदीया बुद्धिः, यथार्थलेशोऽर्थो विस्तारितः, परं कल्ये सूत्रार्थप्रकाशनेन मदात्मा निस्तारणीयः" इति विज्ञप्य वन्दित्वा स स्वकार्ये प्रवृत्तः । द्वितीयेऽपि दिने एत्य तथैवार्थं पप्रच्छ, तदा मुनीशो दध्यौ—"सूत्रार्थप्रकाशनव्यवहारो यद्यप्यहं मुक्तो नास्मि महात्मनि, अन्तर्वृत्त्या तु नास्त्येव, अतः श्रुत्वा तदर्थमर्थं विनाऽऽप्तवचनं न विजानाति, तथा च सम्यगर्थं स्वल्पमपि न कार्यं" इति ध्यात्वा पुनर्द्वि-

तीयोऽर्थं शब्दपर्यायाद्यनुसारेण कृत । ततः श्राद्धोऽपि तथैव प्रशस्य गत । तृतीयेऽपि दिने पृष्ट सूरिरश्रुतपूर्वमर्थं ततान, एव षण्मासी यावन्नवनवार्थनिष्पादनतत्परस्य सूरेरक्षय ज्ञानकोश मत्वा स व्यजिज्ञपत्—"स्वामिन् ! गङ्गासिकतागणगणनायामनन्तज्ञानिन विना न कोऽपि क्षमस्तद्वत्त्वदीयगुणकथने मत्सदृशो न कोऽपि समर्थ , गृहविक्रयत उपार्जित धनं सर्वमद्यैव निष्ठा नीत, अद्य यावत्का समायातं, इदानीं तु स्वगृहे गमिष्यामि, परमिद साहस्करोति मानसे मे न जनादृशा गीतार्थानामन्यर्थे यदि गाथाया मूढात्र ग्रासमहि क्व प्राप्स्यामि ? न कुत्रापीत्यर्थ "। तत सूरि प्राह—"प्रज्ञातेऽवश्यमत्रागन्तव्य त्वया"। तत स हृष्ट स्वोत्तारके गत । अथ स सूरिर्दध्यौ—"विषया यथा यथा वाने ज्ञा तथाऽऽत्मानमधिकतर खोनयन्ति, यतो "तुच्छा श्रिय कामउपासत किं ?" इत्यादि नायक सामुगाथ्यादिसमूढीकृतयन परिहाय ऽन्यजारान्या पूर्वसूरिममानीभूय स्वात्मनिस्तारणार्थं स्वस्थमङ्गीकृत्य स्थित । तत प्रगे स श्राद्धः सूरिं दूरीकृतममत्वकिल्बिषपूर संयमगुणपूर्णं च वीक्ष्य नमितः, त्वदीयममत्वाज्ञारयस्तु तदर्थो दृश्यते, अहो ! तव योग्यता लोकोत्तरा, "मूलस्वरूपेणैव प्रत्रायथार्थानं करिष्ये" इति प्रतिज्ञा युष्मत् पालिता, मत्तो युष्माभिः सफलीकृत मनोरथपूरणेन, पर न स्मा तु अनाकलनीया, यत् क्वापि कोपाद्यं न कृत, अन्यच प्रश्नसमयेऽपि प्रत्युत सुधादृष्टिवृष्टाः पातिताः"। इत्यादि स्तुत्वा सूरिमभिनन्द्य स्थित । सूरिस्तद्गाथार्थं जगौ—

दोससयमूलजालं पुव्वरिसिविवज्जिअं जइ वंतं ।
अत्थं वहसि अणत्थं कीस अणत्थं तवं चरसि ॥ १ ॥

